Stanzas in praise of Jina written in Tūṇaka metre.

Beginning:

अम्बरापगादिदिव्यतीर्थपावनोदकै-
श्चन्दनेन्दुकुङ्कुमा(सिताश्म)भाभिरामकैः ।
मन्दराद्रिमस्तके सुरासुरौघपूजितं
बन्धुराङ्गमर्चयामि वीतरागमच्युतम् ॥

End:

वारिचन्दनाक्षतप्रसूनसज्जदुज्ज्वल-
चारुदीपधूपसत्फलौघदर्भपूर्वकैः ।

स्फारहेमपात्रकु(ह्र)तमर्घ्यमर्घ्यपावनो
भूरितोषतोऽमतोऽर्हतो गतार(तोऽर्ह)याम्यहम् ॥

No. **9446.** जिनराजस्तोत्रम्.

JINARĀJASTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 20*a* of the MS. described under No. 8734.

Complete.

Similar to the work described under No. 9430.

Beginning:

वन्दे तानमरप्रवेकमकुटप्रोतारुणप्रस्फुर-
द्रामस्तोमविमिश्रिताः पदनखाभीशूत्करा रेजिरे ।
येषां तीर्थकरेशिनां सुरसरिद्वारिप्रवाहा यथा
दीव्यद्देवनितम्बिनीस्तनगलत्काश्मीरिपूरान्विताः ॥

वृ(ष)भं त्रिभुवनपतिशतवन्द्यं मन्दरगिरिमिव धीरमनिन्द्यम् ।
वन्दे मनसिजगजमृगराजं राजिततनुमजितं जिनराजम् ।

End:

अनणुगुणनिबद्धामर्हतां(ता)मार्ह(ता)दि-
प्रतिचरितसु(व)र्णानेकपुष्पप्रगुम्भाम् ।
(जिन)पतिनुतिमालां यो विधत्ते स्वकण्ठे
प्रियपतिरमरश्रीमोक्षलक्ष्मीवधूनाम् ॥

No. **9447.** जिनराजस्तोत्रम्.

JINARĀJASTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 8*a* of the MS. described under No. 8746, wherein this work has been mentioned as Samantabhadrastōtra in the list of other works given therein.

Complete.

Same as the above.

No. 9448. जिनवन्दनम्. JINAVANDANAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 15*a* of the MS. described under No. 8734.

Complete.

Similar to the above; in Prākṛt language

Beginning:

अट्ठविहकम्ममुक्के अट्ठगुणड्ढे अणूवमे सिद्धे ।
अट्ठमयुदविणविट्ठे णिट्ठिअ कचेय वड्ढिमोणिचं ॥

End:

दुक्खक्ख ओकम्म खओ जोहिराहोसुगै ।
गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ॥

No. 9449. जिनसुप्रभातम्. JINASUPRABHĀTAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 76*a* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Stanzas wishing good morning to Jina.

Beginning:

यत्स्वर्गावतरोत्सवे यदभवज्जन्माभिषेकोत्सवे
यद्दीक्षाग्रहणोत्सवे यदखिलज्ञानप्रकाशोत्सवे ।
यन्निर्वाणगमोत्सवे जिनपतेः पूजाद्भुतं यद्भवैः
संगीतस्तुतिमङ्गलैः प्रसरतां मे सुप्रभातोत्सवः ॥

श्रीमन्नतामरकिरीटमणिप्रभाभिरालीढपादयुग दुर्धरकर्मदूर ।
श्रीनाभिनन्दनजिनाजितशंभवाख्य त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥

End:

सुप्रभातं सुनक्षत्रं सुकल्याणं सुमङ्गलम् ।
त्रैलोक्यहितकर्तॄणां जिनानामेव शासनम् ॥

No. 9450. जिनसुप्रभातम्.
JINASUPRABHĀTAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 11a of the MS. described under No. 8746.

Complete.

Same work as the above.

No. 9451. जिनस्तुतिः.
JINASTUTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 71b of the MS. described under No. 8735.

Complete.

In praise of Arhat or Jina.

Beginning:

यत्रागाधविशालनिर्मलगुणे लोकत्रयं सर्वदा
सालोकं प्रतिबिम्बितं प्रविशदं नित्यामृतानन्दविन् ।
सर्वज्ञानिमिषास्पदं स्मृतिगतं तापा(प)हं धीमता-
मर्हत्तीर्थमपूर्वमक्षयमिदं वार्धारमालापये ॥

End:

यद्भक्त्या फलदायि पुण्यमुदितं पुण्यं(ण्यै)र्लैवैश्छिद्यते
पापं नैव फलं प्रशद्धि(शु)मपि . . . . ।
आर्हन्त्यं फलमद्भुतं शिवसुखं नित्यं फलं लभ्यते
पादास्तस्य फलोत्तमादिसुफलैः श्रेयःफलायार्जितम् ॥

No. 9452. जिनस्तुतिः.
JINASTUTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 8b of the MS. described under No. 8734, wherein this work has been mentioned as Prākṛtastōtra in the list of other works given therein.

Complete.

This is in praise of the Jinas or Jaina saints or gods and contains stanzas in Prākṛt and Sanskrit.

Beginning:

पडिक्कमामिभत्ते ईर्यापहियाये विराहणा अणावुत्ते ।
अइगमणे णिग्गमणे ठाणेगमणे चक्कमणे ॥
पाणुग्गमणे भुजुग्गमणे हरिदुग्गमणे उच्चारपस्सवणे ।
भआसिंहाअणविअणी वयठाणीयाव जे जीव ॥

End:

ईर्यापथे प्रचलताद्य मया प्रमादा-
देकेन्द्रियप्रमुखजीवनिकायबाधा ।
निर्वर्तिता यदि भवेद्युगान्तरक्षा
मिथ्या तदस्तु दुरितं गुरुभक्तितो मे ॥

* * * *

समणुमणिअत्तस्समिद्दामिदुक्कडम् ॥

No. 9453. जिनस्तुतिः.
JINASTUTIḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 92*a* of the MS. described under No. 9470. The other works contained herein will be noted under that number.

Complete.

Same work as the above.

No. 9454. जिनस्तुतिः
JINASTUTIḤ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 44*b* of the MS. described under No. 8734, wherein this work has been mentioned as Prākṛtastōtra 43*b* in the list of other works given therein.

Complete.

Similar to the above. This is in Prākṛt language.

Beginning:

अट्ठावशं हि उसहा चप्पाएवा सुज्जजिण्णाह ।
उज्झत्तिणेमिज्जिण्णापादाए णिव्वुदो महावीरो ॥

End:

वृषभस्य वासुपूज्यस्य नेमिपर्यङ्कयोगतः ।
कायोत्सर्गस्थितानां तु सिद्धिः शेषो जिनेशिनाम् ॥

* * * *

गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ॥

No. 9455. जिनस्तुतिः.

JINASTUTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 56 of the MS. described under No. 8734.

Complete.

Similar to the above.

Beginning:

गत्वा क्षितेर्वियति पञ्चसहस्रदण्डान्
सोपानविंशतिसहस्रविराजमाना ।
रेजे सभा धन(द)यक्षकृता यदीया
तस्मै नमस्त्रिभुवनप्रभवे जिनाय ॥

End:

सेनापतिस्थपति(निर्मित)हर्म्यपार्श्व-
श्रीधर्मचक्रमाणितोरणिकाः पुरोगाः ।
तत्रास दण्डपतयः प्रणमन्ति यस्मै
तस्मै नम(स्त्रिभुवनप्रभवे जिनाय) ॥

No. 9456. जिनस्तुतिः.

JINASTUTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above.

Beginning:

> शास्त्राभ्यासो जिनपतिनुतिः संगतिः सर्वदार्यैः
> (जैनेन्द्राणां) गुणगणकथा दोषवादे च मौनम् ॥
> सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे
> संपद्यन्तां मम भवभवे यावदेतेऽपवर्गः ॥
> जैनमार्गरुचिरन्यमार्गनिर्वेग(द)ता जिनगुणस्तुतौ मतिः ।
> आकलङ्कविमलोक्तिभावना संभवन्तु मम जन्मजन्मनि ॥

End:

> तव पादौ मम हृदये मम हृदयं तव पदद्वये लीनम् ।
> तिष्ठतु जिनेन्द्र ताव[याव]जिनेन्द्र निर्वाणसंप्राप्तिः ॥

No. 9457. जिनस्तुतिः.

JINASTUTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 48*b* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above.

Beginning:

> एकापि समर्थेयं जिनभक्तिर्दुर्गतिं निवारयितुम् ।
> पुण्यानि च पूरयितुं दातुं मुक्तिश्रियं कृतिनः ॥
> पच्च अरिज्जअ णा मे पच्चअमदिसाअके जिणे वन्दे ।
> पच्चअसोअरणामे पच्चअसीमन्दके वन्दे ॥

End :

त्वं धर्मो दयितापराश्रमशुकस्त्वं काव्यबन्धक्रम-
क्रीडानन्दनकोकिलस्त्वमुचितश्रीमल्लिकाषट्पदः ।
त्वं पुन्नागकथारविन्दसरसीहंसस्त्वमुत्तंसकैः
कैर्भूपाल सदार्यसद्गुणमणीसङ्गालिभिर्मौलिभिः ॥

No. 9458. जिनस्तुतिः.
JINASTUTIḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 8746, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above.

Beginning :

सर्वेन्द्रस्तुत्यपादाब्जं सर्वज्ञं दोषवर्जितम् ।
श्रीजिनाधीश्वरं नौमि परमानन्दमक्षयम् ॥

End :

मोक्षमार्गस्य नेतारं छेत्तारं कर्मभूभृताम् ।
ज्ञातारं विश्वतत्त्वानां वन्दे तद्गुणलब्धये ॥

* * * *

यावन्ति जिनचैत्यानि विद्यन्ते भुवनत्रये ।
तावन्ति सततं भक्त्या त्रिः परीत्य नमाम्यहम् ॥

No. 9459. जिनाष्टकम्.
JINĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 42*a* of the MS. described under No. 5162, wherein this work has been stated to begin on fol. 42*b* in the list of other work given herein.

Eight stanzas in praise of Jina.

Beginning:

तुभ्यं नमोऽस्तु शिवशंक(र)शंकराय
तुभ्यं नमोऽस्तु कृतकृत्यमहोन्नताय ।
तुभ्यं नमोऽस्तु घनघातिविनाशनाय
तुभ्यं नमोऽस्तु विभवे जिनगुम्म(म्भ)पाय ॥ १ ॥

End:

तुभ्यं नमोस्तुनि(स्त्व)खिललोकविलोकनाय
तुभ्यं नमोऽस्तु परमार्थगुणाष्टकाय ।
तुभ्यं नमो[स्तु] जिनु(न)गणाधिपपावनाय
तुभ्यं नमोऽस्तु विभवे जिनगुम्म(म्भ)पाय ॥ ८ ॥

No. **9460.** जिनेन्द्रस्तुतिः.
JINENDRASTUTIḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 6*b* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above.

Beginning:

निःसङ्गोऽहं जिनानां सदनमनुपमं त्रिः परीत्यैत्य भक्त्या
स्थित्वा गत्वा निषिध्यचरणपरिणतोऽन्तः शनैर्हस्तयुग्मम् ।
फाले संस्थाप्य बुद्ध्या मम दुरितहरं कीर्तये शक्रवन्द्यं
निन्दादूरं सदाप्तं क्षयरहितममुं ज्ञानभानुं जिनेन्द्रम् ॥

End:

करचरणतनुविघाताददतो निहतः प्रमाणतः प्राणैः ।
ईर्यापथमिति भीत्या मुञ्चे तद्दोषहान्यर्थम् ॥

No. 9461. जिनेन्द्रस्तुतिः.
JINĒNDRASTUTIḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 90*a* of the MS. described under No. 9470. The other works contained herein will be noted under that No.

Complete.

Same work as the above.

No. 9462. जिनेन्द्रस्तुतिः.
JINĒNDRASTUTIḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 8746, wherein it is given as Jinastōtra in the list of other works given therein.

Complete.

Same work as the above.

No. 9463. जैनपुष्पाञ्जलिस्तोत्रम्.
JAINAPUṢPĀÑJALISTŌTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 8735.

Complete.

In praise of Jina followed by flower offerings.

Beginning :

पुष्पाञ्जले नमस्तुभ्यं ललिताङ्गाय ते नमः ।
श्रीमते वज्रजङ्घाय धर्मतीर्थप्रवर्तिने ॥
नमस्तैरार्य ते शुद्धिः श्रिते श्रीधर ते नमः ।
नमः सुविषये तुभ्यमच्युतेन्द्र नमोऽस्तु ते ॥

End :

त्वां देवमित्थमभिवन्द्य कृतप्रणामो
नान्यत्फलं परिमितं परिमार्गयामि ।
त्वय्येव भक्तिमचलां जिन मे दिश त्वं
सा सर्वमभ्युदयमुक्तिफलं प्रसूते ॥

फलं त्रैलोक्यसाम्राज्यं क्लेश(शे)स्त्वच्चरणस्मृतिः ।
तथापि लोको मन्देच्छो न वेत्ति हितमात्मने ॥

No. 9464. जैनप्रपत्तिः.
JAINAPRAPATTIḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 37*a* of the MS. described under No. 8738, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Two stanzasi n which a Jaina devotee surrenders himself to the mercy of Vardhamāna and Gōmaṭhēśa, the latter being considered to be the son of Vṛṣabhatīrthaṅkara and called also Bhujabalin, Gummaṭa, etc.

Beginning and **End**:

देवाधिदेव परमेश्वर वीतराग
सर्वज्ञ तीर्थिकर सिद्ध महानुभाव ।
त्रैलोक्यनाथ जिनपुङ्गव वर्धमान
स्वामिन् गतोऽस्मि शरणं चरणद्वयं ते ॥
संमोदसंनतसुरेश्वरवारचूडासंचद्धरत्नकिरणावलिलालिताङ्घ्रिम् ।
भीमाजवज्ज्वलसरित्पतिवाडवाग्निं श्रीगोमठेश चरणं शरणं प्रपद्ये ॥

No. 9465. जैनस्तोत्रम्.
JAINASTŌTRAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 39*b* of the MS. described under No. 8734, wherein this work is stated to begin on fol. 38*b* in the list of other works given therein.

Complete.

Similar to the work described under No. 9462.

Beginning:

नित्यं निःस्वेदत्वं निर्मलता क्षीरगौररुचिरत्वं च ।
स्वाद्याकृतिसंहनने सौरूप्यं सौरभं च सौलक्षण्यम् ॥
अप्रमितवीर्यता च प्रियहितवादित्वमन्यदमितगुणस्य ।
प्रथिता दश संख्याताः स्वतिशयधर्माः स्वयंभुवो देवस्य ॥

End:

यस्येह चतुस्त्रिंशत्प्रवरगुणाः प्रातिहार्यलक्ष्म्याश्चाष्टौ ।
तस्मै नमो भ(ग)वते त्रिभुव(न)परमेश्वरार्हते गुणमहते ॥

* * * *

गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ॥

No. 9466. जैनाचार्यस्तुतिः.
JAINĀCĀRYASTUTIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 8735.

Complete.

In praise of Jaina religious preceptors.

Beginning:

पुनातु नः सौरु(र)भलोभलोलमधुव्रतश्रेणिकृतानुषङ्गा ।
नदीव गङ्गा यमुनाद्वितीया मुनीन्द्रपादार्चनवारिधारा ॥

End:

सोल्लासो मुनिचक्रवर्तिचरणद्वन्द्वार्चितो नूतन-
स्त्यानामोदकुतूहलोपरिपतद्भृङ्गावलीलङ्घितः ।
निष्प्रत्यूहतपोबलाहतनमस्कारास्वजीवालता-
बाणव्यूहनिभः शुभानि जगतां पुष्णातु पुष्पाञ्जलिः ॥

No. 9467. तीर्थकरस्तोत्रम्.
TĪRTHAKARASTŌTRAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 8734.

Complete.

The first stanza gives certain characteristics of the various Tirthaṅkaras.

In praise of the Jinas past, present and future in the three regions, viz., Jambūdvīpa, Dhātakikhaṇḍa and Puṣkarārdha.

Beginning:

विमलप्रभ, श्रीधर, सुदत्त, अमलप्रभ

* * * *

देवेभ्यो नमो नमः ॥

द्वौ कुन्देन्दुतुषार(र)हारधवलौ द्वाविन्द्रनीलप्रभौ
(द्वौ बन्धूकसमप्रभौ) जिनवृषौ द्वौ च प्रियङ्गुप्रभौ ।
शेषाः षोडश जन्ममृत्युरहिताः संततहेमप्रभा-
स्ते सज्ज्ञानसुधाकरा (जिनवरा भद्राणि) यच्छन्तु वः ॥
वरकनकशख(ङ्ख)विद्रुममरकतघनसंनिभं विगतमोहम् ।
सप्ततिशतं जिनानां सर्वामरवन्दितं वन्दे ॥

End:

जम्बूधातकिपुष्प(ष्क)रार्धवसुधाक्षेत्रत्रये ये भवाः
चन्द्राम्भोजशिखण्डकण्ठकनकप्रावृड्घनाभा जिनाः ।
सम्यग्ज्ञानचरित्ररक्षणपरा दग्धाष्टकर्मेन्धना(द्भवाः)
भूतानागतवर्तमानसमये तेभ्यो जिनेभ्यो नमः ॥

* * * *

गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ॥

No. 9468. तीर्थकरस्तोत्रम्.

TĪRTHAKARASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 9b of the MS. described under No. 8746, wherein this work has been omitted to be mentioned in the list of other works given threrein.

Incomplete.

Same work as the above.

No. 9469. दृष्टाष्टकम्.
DṚṢṬĀṢṬAKAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 27*a* of the MS. described under No. 9424.

Complete.

This work expresses in eight stanzas the feelings of joy of a Jaina devotee on seeing a Jaina temple.

Beginning:

अपवित्रः पवित्रो वा सुस्थितो दुःस्थितोऽपि वा ।
ध्यायेत्पञ्चनमस्कारं सर्वपापैः प्रमुच्यते ॥
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्परमात्मानं सबाह्याभ्यन्तरः शुचिः ॥

* * * *

दृष्टं जिनेन्द्रभवनं भवतापहारि भव्यात्मनां विभवसंभवभूरिहेतुः ।
दुग्धाब्धिफेनधवलोज्ज्वलकोटकोटिनद्धध्वजप्रकरराजिविराजमानम् ॥

End:

दृष्टं मयाद्य मणिकाञ्चनचित्रतुङ्गं
सिंहासनादिजिनबिम्बविभूतियुक्तम् ।
चैत्यालयं यदतुलं परिकीर्तितं च
सन्मङ्गलं सकलचण्डमुनीन्द्रवन्द्यम् ॥

Colophon:

इति श्रीदृष्टाष्टकं समाप्तम् ॥

No. 9470. दृष्टाष्टकम्.
DṚṢṬĀṢṬAKAM.

Substance, palm-leaf (Śrītāla). Size, 8 × 1¾ inches. Pages, 3. Lines, 8 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 94*a*. The other works herein are Pañcaparamēṣṭhisvarūpanirūpaṇa (Kanarese) 1*a*, Śrāvakācāra (Kanarese) 56*a*,

Yōgāmṛta (Kanarese) 78a, Jinēndrastuti with Kanarese meaning 90a, Jinastōtra (Prākṛta) 92a, Jainavratavarṇana with Kanarese meaning 96a.

Complete.

Same work as the above.

No. 9471. दृष्टाष्टकम्.
DṚṢṬĀṢṬAKAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 4b of the MS. described under No. 8734.

Complete.

Same work as the above.

No. 9472. धर्मतीर्थपञ्चकम्.
DHARMATĪRTHAPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 55a of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the fifteenth Tīrthaṅkara named Dharmanātha.

Beginning:

धर्मतीर्थमनघं प्रवर्तयन् धर्म इत्यनुमतः सतां भवान् ।
कर्मकक्षव(द)ह(न)स्तपोऽग्निभिः शर्म शाश्वतमवाप शङ्करः ॥

End:

मानुषेन्द्रकृतिमभ्यतीतवान् देवतास्वपि च देवता यतः ।
तेन नाथ परमासि देवता श्रेयसे जिनवृष प्रसीद नः ॥

No. 9473. नन्दीश्वरभक्तिः.
NANDĪŚVARABHAKTIḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 37a of the MS. described under No. 8734.

Complete.

In praise of Nandiśvara who is considered to be a devotee of the Jina.

Beginning:

त्रिदशपतिमकुटतटगतमणिगणकरनिकरसलिलधाराधौत ।
क्रमकमलयुगलजिनपतिरुचिरप्रतिबिम्बविलयविरहिनिलयान् ॥
निलयानहमिह मनसा सहसा प्रणिपतनपूर्वमवनौम्यवनौ ।
त्रय्यां त्रय्या शुद्ध्या निसर्गशुद्धान् विशुद्धये घनरजसाम् ॥

* * * *

नन्दीश्वरसद्द्वीपी नन्दीश्वरजलधिपरिवृते धृतशोभे ।
चन्द्रकरनिकरसंनिभरुद्रयशोऽधित दिङ्महीमण्डलके ॥

End:

संध्यासु तिसृषु नित्यं पठेयदि स्तोत्रमेतदुत्तमयशसाम् ।
सर्वज्ञानां सार्वि त्वां लभते श्रुतपारिणि(ण)तं पदममितम् ॥

No. 9474. नमिनाथपञ्चकम्.
NAMINĀTHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 58*a* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of Naminātha who is considered to be the twenty-first Tīrthaṅkara.

Beginning:

स्तुतिः स्तोतुः साधोः कुशलपरिणामाय स तदा
भवेन्मा वा स्तुत्यः फलमपि ततस्तस्य च सतः ।
किमेवं संवि(खि)द्यज्जगति सुलभे श्रायसपदे
स्तुयान्न त्वा विद्वान् सततमभिपूज्यं नमिजिनम् ॥ १ ॥

End:

वपुर्भूषालेपः(श)व्यवधिरहितं शान्तकरणं
यतस्ते संचष्टे स्मरशरविषातङ्कविलयम् ।

विना भीमैः शस्त्रैरदयहृदयाममप(नामपि)[वि]लयं
ततस्तं(स्त्वं)निर्मोहः शरणमसि नः शान्तिनिलयः ॥ ५ ॥

No. 9475. निर्वाणभक्तिः.

NIRVĀṆABHAKTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 43a of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

In praise of the various places in which the various Tīrthaṅkaras left their mortal bodies and obtained Nirvāṇa or soul deliverancei from bondage. From the last stanza, it is made out that Munīndra breathed his last in Mount Kailāsa, Vāsupūjya at Campāpuri (in North Bengal), Nēminātha at Ujjinta or Mount Girnar, Vardhmāna at Pāvāpuri and twenty other Tīrthaṅkaras on Saṁmēda mount.

Beginning:

यत्रार्हतां गणभृतां श्रुतपारगाणां
निर्वाणभूमिरिह भारतवर्षजानाम् ।
तामद्य शुद्धमनसा क्रियया वचोभिः
संस्तोतुमुद्यतमतिः परिणौमि भक्त्या ॥

End:

कैलासाद्रौ मुनीन्द्रः पुरुरपदुरितो मुक्तिमाप प्रणूतः
श्चम्पायां वासुपूज्यस्त्रिदशपतिनुतो नेमिरपू(रु)ज्जिन्त(आप) ।
पावायां वर्धमानस्त्रिभुवनगुरवो विंशतिस्तीर्थनाथाः
संमेदाद्रौ प्रजग्मुर्ददतु विनिवृता निर्वृतिं नो जिनेन्द्राः ॥

No. 9476. निर्वाणभक्तिः.

NIRVĀṆABHAKTIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 37*a* of the MS. described under No. 8746, wherein this work has been stated to begin on fol. 35*a* in the list of other works given therein.

Complete.

Same work as the above.

No. 9477. नेमिनाथपञ्चकम्.

NĒMINĀTHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 58*b* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the twenty-second Tīrthaṅkara who is called Nēminātha.

Beginning :

भगवानृषि(:) परमयोऽथ दहनहुतकल्मषेन्धनो ज्ञान-
विपुलकिरणैः सकलं प्रतिबुद्ध(रक्त)कमलायतेक्षणः ।
हरिवंशकेतुरनवद्यविनयनमितीर्थनायकः शील-
जलधिरभवो विभवस्त्वमरिष्टनेमिजिनकुञ्जरोऽजरः ॥ १ ॥

End :

बहिरन्तरप्युभयथा च करणमविघातिनार्थकृन्नाथ
युगपदखिलं च सदा त्वमिदं तदामलकवद्विवेदितः ।
अथ विद्रते बुधनुतस्य चरितगुणमद्भुतोदयं न्याय-
विहितमवधार्य जिने त्वयि सुप्रसन्नमनसः स्थिता वयम् ॥ ५ ॥

No. 9478. पञ्चगुरुभक्तिः.
PAÑCAGURUBHAKTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 23*a* of the MS. described under No. 8734.
Complete.

Five stanzas in praise of Jinas who have become Siddhas.

Beginning:

श्रीमद(म)रेन्द्रमकुटप्रघटितमणिकिरणवारिधाराभिः ।
प्रक्षालितपदयुगलान् प्रणमामि जिनेश्वरान् भक्त्या ॥
अष्टगुणैः समुपेतान् प्रणष्टदुष्टाष्टकर्मरिपुसमितीन् ।
सिद्धान् सततमनन्तान् नमस्करोमीष्टसंसिद्ध्यै ॥

End:

जिनसिद्धसूरिदेशिकसाधुवरानमलगुणगणोपेतान् ।
पञ्चनमस्कारपदैस्त्रिसन्ध्यमभिनौमि संप्रीत्या ।

* * * *

एष पञ्चनमस्कारः पापकर्मविनाशनः ।
मङ्गलानां च सर्वेषां प्रथमं भवतु मङ्गलम् ॥
अस्माकं जिनसिद्धश्रीसूरिदेशिकसाधवः ।
कुर्वन्तु गुरवः सर्वे निर्वाणपरमश्रियम् ॥

* * * *

गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ।

No. 9479. पद्मप्रभपञ्चकम्.
PADMAPRABHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 51*a* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the sixth Tirthaṅkara named Padmaprabha

Beginning :

पद्मप्रभः पद्मपलाशवेश्यः पद्मालयालिङ्गितचारुमूर्तिः ।
बभौ भवान् भव्यपयोरुहाणां पद्माकराणामिव पद्मबन्धुः ॥

End :

गुणाम्बुधेर्विप्रुषमप्यजस्रं नाखण्डलः स्तोतुमलं तवर्षेः ।
प्रागेव माहक् किमुतातिभक्तिर्मां बालमालापयतीदमित्थम् ॥

No. 9480. पार्श्वनाथपञ्चकम्.
PĀRŚVANĀTHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 59*a* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of Pārśvanātha who is considered to be the twenty-third Tirthaṅkara.

Beginning :

तमालनीलैः सधनुस्तटिद्गुणैः प्रकीर्णभीमाशनिवायुवृष्टिभिः ।
बलाहकैर्वैरिवशैरपद्रुतो महामना यो न चचाल योगतः ॥

End :

स सत्यविद्यातपसां प्रणायकः समग्रधीरुग्रकुलाम्बरांशुमान् ।
मया प(स)दा पार्श्वजिनः प्रणम्यते विलीनमिथ्यापथदृष्टिविभ्रमः ॥

No. 9481. पार्श्वनाथाष्टकम्.
PĀRŚVANĀTHĀṢṬAKAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 80*a* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Same work as the one described under R. No. 137(a) of the Triennial Catalogue of MSS., Vol. I, Part I—A.

No. 9482. ब्रह्मदेवस्तुतिः.
BRAHMADĒVASTUTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 66a of the MS. described under No. 8735.

Complete.

In praise of Brahma or Brahmadēva.

Beginning:

श्रीजैनधर्मामरधेनुगोपं स्वभक्तलोकोत्तरकल्पभूजम् ।
श्रीब्रह्मदेवं वरमाप्तुकामं(म)स्तैस्तैरनल्पैरभिषेचयामि ॥

End:

धाराभिः पयसां मनोहरसुगन्धैरक्षतैर्निर्मलैः
संक्षिप्तैः प्रमदैरुदारसुमनोदामोत्करैरुत्तरैः ।
नैवेद्यैरनवद्यदीपनिकरैर्धूपैश्च वस्त्रादिभि-
र्भूषाभिर्वरपीठिकाभिरनिशं ब्रह्माणमाराधयेत् ॥

No. 9483. ब्रह्मयक्षस्तोत्रम्.
BRAHMAYAKṢASTŌTRAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 108a of the MS. described under No. 8738.

Complete.

In praise of Brahmayakṣēśvara.

Beginning:

श्रीमच्छीतलशेखरं गुणनिधिं चापेषुसंधारिणं
वाणीदत्तनिरीक्षणं नृवलितं शेषाङ्गमाबद्धजम् ।
रूढं कुण्डलहारकङ्कणलसद्यज्ञोपवीतान्वितं
मिथ्याध्वान्तदिवाकरं सुरवरं श्रीब्रह्मयक्षं भजे ॥

End :

श्रीमच्छीतलपादयुग्मविकसत्पद्मावतंसं सुर-
व्राजैरर्चितकल्पभूरुहसुमं वन्दे सरोजेक्षणम् ।
श्रीमद्रत्नविभूषणादिपतकैरत्यन्तशोभ्यङ्गना-
युक्तं भक्तनताशयाम्बुजरविं श्रीब्रह्मयक्षेश्वरम् ॥

No. 9484. ब्रह्मयक्षाष्टकम्.

BRAHMAYAKṢĀṢṬAKAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 110*a* of the MS. described under No. 8738, wherein it is wrongly mentioned as Brahmayakṣaśataka in the list of other works.

Complete.

Eight stanzas in praise of Brahmayakṣadēva who is probably an attendant of a Tīrthaṅkara.

Beginning :

तरङ्गिण्यधीशोरुरङ्गत्तरङ्गं स्थितिर्भङ्गदं मङ्गलाङ्गत्तरङ्गम् ।
क्वणत्किङ्किणीकं समारूढसुभ्रं हृदि ब्रह्मदेवं मुदा संददे(धे)ऽहम् ॥

End :

वा(वचः)स्पर्धिनीपूरयज्ञोपवीतं यशःपूरकर्पूरकामोदितांसम् ।
सुधर्मामृताम्भोधिराका(का)सुधांशुं हृदि ब्रह्मदेवं मुदा संददे(धे)ऽहम् ॥
ब्रह्मदेवाष्टकं तिष्ठः(न्)यः पठेत्सान्द्रभक्तितः ।
तस्य विघ्नोपशमनं कार्यसिद्धिश्च संभवेत् ॥

No. 9485. भक्तामरस्तोत्रम्.

BHAKTĀMARASTŌTRAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 14*a* of the MS. described under No. 8738.

Complete.

A devotional poem in praise of Vṛṣabha who is held to be the first of the Tīrthaṅkaras. The author of the work is Mānatuṅgācārya. This work is printed in Kāvyamālā, Part VII, 1890.

Beginning:

भक्तामरप्रणतमौलिमणिप्रभाभि-
रुद्योतितं दलितपापतमोवितानम् ।
सम्यक्प्रणम्य जिनपादयुगं युगादा-
वालम्बनं भवनिधौ पततां जनानाम् ॥
यः संस्तुतः सकलवाङ्मयतत्त्वबोधा-
दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः ।
स्तोत्रैर्जगत्रितयचित्तहरैरुदारैः
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥

End:

स्तोत्रस्रजं तव जिनेन्द्र गुणैर्निबद्धां
भक्त्या मया विविधवर्णविचित्रपुष्पाम् ।
धत्ते जनो यमि(इ)ह कण्ठगतामजस्रं
तं मानतुङ्गमवशा समुपैति लक्ष्मीः ॥

Colophon:

इति भक्तामरस्तोत्रं संपूर्णम् ॥

No. **9486.** भूपालस्तोत्रम्.
BHŪPĀLASTŌTRAM.

Pages, 11. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 8738.

Complete.

Twenty-four stanzas in praise of Jina: by Bhūpāla.

Beginning:

श्रीलीलायतनं महीकुलगृहं कीर्तिप्रमोदास्पदं
वाग्देवीरतिकेतनं जयरमाक्रीडानिधानं महत् ।
स स्यात्सर्वमहोत्सवैकभवनं यः प्रार्थितार्थप्रदं
प्रातः पश्यति कल्पपादपदलच्छायं जिनाङ्घ्रिद्वयम् ॥

End:

> दृष्टस्त्वं जिनराजचन्द्र विकसद्भूपेन्द्रनेत्रोत्पल
> स्नातस्त्वन्नुतिचन्द्रिकाम्भसि भवद्विद्वच्चकोरोत्सवे ।
> नीतश्चाघनिदाघजक्लमभरः शान्ति मया गम्यते
> देव त्वद्गतचेतसैव भवतो भूयात्पुनर्दर्शनम् ॥

Colophon:

> इति भूपालस्तोत्रं परिसमाप्तम् ॥

No. 9487. भूपालस्तोत्रम्.
BHŪPĀLASTŌTRAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 8734.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

> आयातस्त्रिजगत्पते तव पदद्वन्द्वाम्बुजाराधान(घनैः)
> वां(वाञ्छा)वाप्तिरि(र)तो मनःस्तुतिशतैः स्तुत्वा भवन्तं महत् ।
> पुण्यं चोपचितं पवित्रत(नु)को जातोऽस्मि संमत्यहं
> गच्छामि प्रथितार्चनस्य भवतो भूयात्पुनर्धारणम् ॥

No. 9488. मल्लिनाथपञ्चकम्.
MALLINĀTHAPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 57*b* of the MS. described under No. 8734, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

Five stanzas addressed in praise of Mallinātha who was considered to be the nineteenth Tīrthaṅkara.

Beginning:

> यस्य महर्षेः सकलपदार्थप्रत्ययबोधः समजनि साक्षात् ।
> सामरमर्त्यं जगदपि सर्वं प्राञ्जलि भूत्वा प्रणिपतति स्म ॥ १ ॥

End:

यस्य च शुक्लं परमतपोऽग्निध्या(द्वा)वमनन्तं दुरितमवादात् ।
तं जिनसिंहं कृतकरणीयं मल्लिमलं शरणमितोऽस्मि ॥ ५ ॥

No. **9489.** मुनिसुव्रतपञ्चकम्.
MUNISUVRATAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 57*b* of the MS. described under **No.** 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the twentieth Tīrthaṅkara named Munisuvrata.

Beginning:

अधिगतमुनिसुव्रतस्थितिर्मुनिवृषभो मुनिसुव्रतोऽनघ ।
मुनिपरिषदि निर्बभौ भवानुडुपरिषत्परिवीतसोमवत् ॥ १ ॥

End:

दुरितमलकलङ्कदुष्टकं निरुपमयोगबलेन निर्दहन् ।
अभवदभवसौख्यवान् भवान् भवतु ममापि भवोपशान्तये ॥ ५ ॥

No. **9490.** योगभक्तिः (प्राकृत).
YŌGABHAKTIḤ (PRĀKṚTA).

Pages, 7. Lines, 7 on a page.

Begins on fol. 24*b* of the MS. described under No. 8734.

Complete.

Deals with the three Yōgas of the Jinas, which are probably Bhakti, Śānti and Bhaktikāyōtsarga.

Beginning:

इच्छामि भत्तिसात्तिभत्तिकायोसग्गो कइत्तस्स ।
आगोचिउं पचमहाकल्लाणसंपण्णाणं ॥

* * * *

तं जीवदयावण्णतढामदण्णवजिदीसमी अभवे ।
सत्तमअविप्पमुके सत्ताणमयकरे वन्दे ॥

End:

योगीश्वरान् जिनान् सिद्धान् योगनिर्धूतकल्मषान् ।
यौगैस्त्रिभिरहं वन्दे योगस्कन्धप्रतिष्ठितान् ॥

* * * *

गिरिकन्दरदुर्गेषु ये वसन्ति दिगम्बराः ।
पाणिपात्रमठाहारास्ते यान्ति परमां गतिम् ॥

* * * *

गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ॥

No. 9491. वर्धमानचन्द्रस्तोत्रम्.
VARDHAMĀNACANDRASTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 42*a* of the MS. described under No. 8734, wherein this work has been mentioned as Vardhamānacandrāṣṭaka 40*a* in the list of other works given therein.

Complete.

In praise of Vardhamāna who is considered to be the twenty-fourth Tīrthaṅkara.

Beginning:

विबुधपतिखगपनरपतिधनदोरगभूतयक्षपतिमहितम् ।
अतुलसुखविमलनिरुपमशिवममलमनामयं प्राप्तम् ॥
कल्याणैः संस्तोष्ये पञ्चभिरनघं त्रिलोकपरमगुरुम् ।
भव्यजनतुष्टिजननैर्दुरवापैः सन्मतिं भक्त्या ॥

End:

इत्येवं भगवति वर्धमानचन्द्रे यः स्तोत्रं पठति सुसन्ध्ययोर्द्वयोर्हि ।
सोऽनन्तं परमसुखं नृदेवलोके भुक्त्वान्ते शिवपदमक्षयं प्रयाति ॥

No. 9492. वर्धमानचन्द्रस्तोत्रम्.

VARDHAMĀNACANDRASTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 35*a* of the MS. described under No. 8746, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Same work as the above.

No. 9493. वर्धमानस्तोत्रम्.

VARDHAMĀNASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 59*b* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

In praise of Vardhamāna or Mahāvīra who is the last of the Tīrthaṅkaras.

Beginning :

कीर्त्या भुवि भाषि(सि)तया वीर त्वं गुणसमुत्थया भाषि(सि) तया ।
भासोडुसभासितया सोम इव व्योम्नि कुन्दशोभासितया ॥

End:

श्रीवर्धमानमकलङ्कमनिन्द्यवन्द्यं पादारविन्दयुगलं प्रणिपत्य मूर्ध्ना ।
भव्यैकलोकनयनं परिपालयन्तं स्याद्वादवर्त्म परिणौमि समन्तभद्रम् ॥

ये संस्तुता विविधभक्तिसमन्तभद्रै-
रिन्द्रादिभिर्विनतमौलिमणिप्रभाभिः ।
उद्योतिताङ्घ्रिकमलाः सकलावबोधा-
स्ते नो दिशन्तु विमलां कमलां जिनेन्द्राः ॥

No. 9494. वर्धमानस्तोत्रम्.
VARDHAMÂNASTÔTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 15*b* of the MS. described under No. 8746.

Complete.

Same work as the above.

No. 9495. वासुपूज्यपञ्चकम्.
VÂSUPÛJYAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 53*b* of the MS. described under No. 8734, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

In praise of the twelfth Tīrthaṅkara called Vāsupūjya.

Beginning:

शिवासु पूज्योऽभ्युदयक्रियासु त्वं वासुपूज्य त्रिदशेन्द्रपूज्यः ।
मयापि पूज्योऽल्पधिया मुनीन्द्रो दीपार्चिषा किं तपनो न पूज्यः ॥

End:

बाह्येतरोपाधिसमग्रतेयं कार्येषु ते द्रव्यगतः स्वभावः ।
नैवान्यदा मोक्षविधिश्च पुंसां तेनाभिवन्द्यस्त्वमृषिर्बुधानाम् ॥

No. 9496. विमलपञ्चकम्.
VIMALAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 54*a* of the MS. described under No. 8734, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

Five stanzas in praise of the thirteenth Tīrthaṅkara named Vimalanātha.

Beginning:

य एव नित्यक्षणिकादयोऽनया मिथोऽनपेक्षाः स्वपरप्रणाशिनः ।
त एव तत्त्वं विमलस्य ते मुनेः परः परीक्षास्वपरोपकारिणः ॥

End:

नयास्तव स्यात्पदसत्यलाञ्छिता रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतगुणा यतस्ततो भवन्तमार्याः प्रणुता हितैषिणः ॥

No. 9497. विषापहारस्तोत्रम्.
VIṢĀPAHĀRASTŌTRAM.

Pages, 12. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 8728.

Complete.

In praise of Vṛṣabhadēva whose name is here said to be an antidote for all kinds of poison: by Dhanañjaya.

Beginning:

स्वात्मस्थितः सर्वगतः समस्तव्यापारवेदी विनिवृत्तसङ्गः ।
प्रवृद्धकालोऽप्यजरो वरेण्यः पायादपायात्पुरुषः पुराणः ॥

End:

वितरति विहिता यथाकथंचित् जिनविनताय मनीषितानि भक्तिः ।
त्वयि नुतिविषया पुनर्विशेषाद्दिशतु सुखानि यशो धनं जयं च ॥

Colophon:

इति धनञ्जयसूरिविरचितविषापहारस्तोत्रं संपूर्णम् ॥

No. 9498. विषापहारस्तोत्रम्.
VIṢĀPAHĀRASTŌTRAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 70*a* of the MS. described under No. 8734, wherein this work has been stated to begin on fol. 68*a* in the list of other works given therein.

Complete.

Same work as the above.

No. 9499. वीरस्तोत्रम्.
VĪRASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 43*a* of the MS. described under No. 5162, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

In praise of the Tīrthaṅkara named Mahāvīra or Vīra.

Beginning:

यः सर्वाणि चराचराणि विविधद्रव्याणि तेषां गुणान्
पर्याय . . . . सर्वदा ।
जानीते युग(प)त्प्रतिक्षणमतः सर्वज्ञ इत्युच्यते
सर्वज्ञाय जिनेश्वराय महते वीराय तस्मै नमः ॥
येऽभ्यासयन्ति कथयन्ति विचारयन्ति
संभावयन्ति च मुहुर्मुहुरात्मतत्त्वम् ;
ते मोक्षमक्षयमनूनमनन्तसौख्यं
क्षिप्रं प्रयान्ति नवकेवललब्धरूपम् ॥

End:

वीरः सर्वसुरासुरेन्द्रमहितो वीरं बुधाः संश्रिता
वीरेणाभिहतः स्वकर्मनिचयो वीराय भक्त्या नमः ।
वीरात्तीर्थमिदं प्रवृत्तमतुलं वीरस्य घोरं तपो
वीरे श्रीद्युतिकान्तिदीप्तिधृतयो हे वीर भद्रं त्वया ॥
ये वीरपादौ प्रणमन्ति नित्यं ध्याने स्थिताः संयमयोगयुक्ताः ।
ते वीतशोका हि भवन्ति लोके संसारदुर्गं विषमं तरन्ति ॥

No. 9500. वृषभगद्यम्.
VṚṢABHAGADYAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 8735.

Complete.

A kind of rhythmic prose in praise of Vṛṣabhadēva, the first Tīrthaṅkara, under various attributes.

Beginning:

जय जय देवादिदेव परमेश्वर वीतराग सर्वज्ञ त्रिलोकैकनाथ स्वस्ति श्रीमुक्त्यङ्गनास्वयंवरायमाणसमवसरणमध्यस्थितसिंहासनालंकृतहेमचामरा-घष्टमहाप्रातिहार्यविभवसमेत चतुस्त्रिंशदतिशयविराजमानत्रिभुवनजिनविनुत समचतुरश्रवज्र वृषभ ।

End:

निरपेक्षोदितागम स्वपररहितदेव परमानन्द परमात्मपरम वीतराग सर्वज्ञ श्रीजिनेश्वर नमस्ते नमस्ते नमस्ते ॥

No. 9501. वृषभपञ्चकम्.
VṚṢABHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 49*a* of the MS. described under No. 8734, wherein this work has been mentioned as Samantabhadrastuti beginning on fol. 48*a* in the list of other works given therein.

Complete.

Five stanzas in praise of the first of the Tīrthaṅkaras named Vṛṣabha or Ṛṣabhadēva or Ādinātha or Ādiśvara Bhagavān.

Beginning:

नताखण्डलमौलीनां यत्पादनखमण्डलम् ।
खण्डेन्दुशेखरीभूतं नमस्तस्मै स्वयंभुवे ॥

End:

स दिष्टचक्षुर्वृषभोऽर्चितः सतां समग्रविद्यात्मवपुर्निरञ्जनः ।
पुनापि(तु) चेतो मम नाभिनन्दनो जिनोऽजितः क्षुल्लकवादिशासनः ॥

No. 9502. वृषभाष्टकम्.
VṚṢABHĀṢṬAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 17*b* of the MS. described under No. 8746.

Complete.

Eight stanzas in praise of the first Tīrthaṅkara named Vṛṣabhadēva.

Beginning:

इन्द्रोरगेन्द्रमनुजेन्द्रकिरीटकोटिमाणिक्यमञ्जुलमरीचिविराजिताङ्घ्रिम् ।
नाकाङ्गनानटनशोभितनाट्यरङ्गं तीर्थकरं वृषभनाथमहं नमामि ॥

End:

वृषभेशाष्टकं भक्त्या यः पठेत्स(त)तं[म]क्रमं(मात्) ।
भूशचीमुक्तिकान्तानां कान्तो भवति निश्चितम् ॥

No. 9503. शम्भवपञ्चकम्.
ŚAMBHAVAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 50*a* of the MS. described under No. 8734, wherein this work has been mentioned as Jinanāthapañcaka in the list of other works given therein.

Complete.

Five stanzas in praise of Śambhavanātha, who is considered to be the third of the Tīrthaṅkaras.

Beginning:

त्वं शंभवः शं(सन्)भवतरु(तीव्र)रोगैः संतप्यमानस्य जनस्य लोके ।
आसीरिहाकस्मिक एव वैद्यो वैद्यो यथा (देहि)रुजः प्रशान्त्यै ॥

End:

शक्रोऽप्यशक्तस्तव पुण्यकीर्तेः स्तुत्यां प्रवृत्तः किमु मादृशोऽज्ञः ।
तथापि भक्त्या स्तुतपादपद्मो ममार्य देयाः शिवतातिमुच्चैः ॥

No. 9504. शान्तिनाथपञ्चकम्.
ŚĀNTINĀTHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 55a of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the sixteenth Tīrthaṅkara named Śāntinātha.

Beginning:

> विधाय रक्षां परतः प्रजानां राजा चिरं योऽप्रतिमप्रतापः ।
> व्यधात्पुरस्तात्स्वत एव शान्तिर्मुनिर्दयामूर्तिरिवाघशान्तिम् ॥

End:

> स्वदोषशान्त्या विहितात्मशान्तिः शान्तेर्विधाता शरणं गतानाम् ।
> भूयाद्भवक्लेशभयोपशान्त्यै शान्तिर्जिनो मे भगवान् वरेण्यः ॥

No. 9505. शान्त्यष्टकम्.
ŚĀNTYAṢṬAKAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 9b of the MS. described under No 8734.

Complete.

Eight stanzas in praise of Śāntinātha who is the sixteenth Tīrthaṅkara.

Beginning:

> न स्नेहाच्छरणं प्रयान्ति भगवन्पादद्वयं ते प्रजाः
> हेतुस्तत्र विचित्रदुःखनिचयः संसारघोरार्णवः ।
> अत्यन्तस्फुरदुग्ररश्मिनिकरव्याकीर्णभूमण्डलो
> ग्रैष्मः कारयतीन्दुपादसलिलच्छायानुरागं रविः ॥
> क्रुद्धाशीविषदष्टदुर्जयविषज्वालावलीविक्रमो
> विद्याभेषजमन्त्रतोयहवनैर्याति प्रशान्तिं यथा ।

तद्वचे चरणारुणाम्बुजयुगस्तोत्रोन्मुखानां नृणां
विघ्नाः कामविनायकाश्च सहसा शाम्यन्त्यहो विस्मयः ॥

End:

शान्ति शान्तिजिनेन्द्र शान्तमनसस्त्वत्पादपद्माश्रयाः
संप्राप्ताः पृथिवीतलेऽपि बहवः शान्त्यर्थिनः प्राणिनः ।
पण्यात्मन्मम भाक्तिकस्य च विभो दृष्टिं प्रसन्नां कुरु
त्वत्पादद्वयदैवतस्य पठतः शान्त्यष्टकं भक्तितः ॥

No. 9506. शान्त्यष्टकम्.
ŚĀNTYAṢṬAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 5*b* of the MS. described under No. 8746.
Complete.
Same work as the above.

No. 9507. शान्त्यष्टकम्.
ŚĀNTYAṢṬAKAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 23*b* of the MS. described under No. 8734.
Complete.

Similar to the above. Herein the supplicant specially prays the Jina to confer peace on all people.

Beginning:

शान्तिजिनं शशिनिर्मलवक्त्रं शीलगुणव्रतसंयमपात्रम् ।
अष्टशतार्चितलक्षणगात्रं नौमि जिनोत्तममम्बुजनेत्रम् ॥

End:

संपूजकानां प्रतिपालकानां यतीन्द्रसामान्यतपोधनानाम् ।
देशस्य राष्ट्रस्य पुरस्य राज्ञः करोतु शान्ति भगवान् जिनेन्द्रः ॥

No. 9508. शीतलपञ्चकम्.
ŚĪTALAPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 53a of the MS. described under No. 8734, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

Five stanzas in praise of the tenth Tīrthaṅkara called Śītalanātha.

Beginning:

न शीतलाश्चन्दनचन्द्ररश्मयो न गाङ्गमम्भो न च हारयष्टयः ।
यथा मुनेस्तेऽनघवाक्यरश्मयश्शमाम्बुगर्भाश्शिशिरा विपश्चिताम् ॥

End:

त्वमुत्तमज्योतिरजः क निर्वृतः क ते परे बुद्धिलवोद्धताः क्षताः ।
ततः स्वनिश्श्रेयसभावनापरैर्बुद्धप्रवेकैर्जिन शीतलेज्यसे ॥

No. 9509. श्रीज्वालिनीदेविकास्तोत्रम्.
ŚRĪJVĀLINĪDĒVIKĀSTŌTRAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 117a of the MS. described under No. 8738, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

This is in praise of the goddess Jvālinīdēvī of the Jainas; and its due repetition daily is held to have the power to enable one to accomplish one's desires very easily: by Malliṣēṇa.

Beginning:

पाशत्रिशूलझषचक्रधनुःशरौघ-
सन्मातुलङ्गफलदानकराष्टबाहुम्(:) ।
मातङ्गतुङ्गमहिषाधिपवाहना यः(या)
सा पातु मां शिखिमती शरदिन्दुवर्णा ॥

ह्रां ह्रीं सुबीजमुखहोमपदान्तमन्त्रै-
र्ज्वालिनीप्रमुखकैर्मम पादनाभि ।
वक्षःस्थलाननशिरांसि च रक्ष रक्ष
त्वं देव्यमीभिरिति पञ्चविधैः सुमन्त्रैः ॥

End:

इत्थं पण्डितमल्लिषेणरचितं श्रीज्वालिनीदेविका-
स्तोत्रं शान्तिकरं भयापहरणं सौभाग्यसंपत्करम् ।
प्रातर्मस्तकसंनिवेशितकरो नित्यं पठेद्यः पुमान्
श्रीसौभाग्यमनोऽभिवाञ्छितफलं प्राप्नोत्यसौ लीलया ॥

No. 9510. श्रुतभक्तिः.
ŚRUTABHAKTIḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 30*a* of the MS. described under No. 8734.

Complete.

In praise of the various kinds of knowledge recognised by the Jainas.

Beginning:

स्तोष्ये सज्ज्ञानानि परोक्षप्रत्यक्षभेदभिन्नानि ।
लोकालोकविलोकनलोलितसल्लोकलोचनानि सदा ॥
अभिमुखनियमितबोधनमाखिलबोधिकमनिन्द्रियेन्द्रियजम् ।
बह्वाद्यवग्रहादिकश्रुतषट्त्रिंशत्रिशतभेदम् ॥
विविधर्द्धिबुद्धिकोष्ठस्फुटबीजपदानुसारिबुद्ध्यधिकम् ।
संभिन्नश्रोत्रतया सार्धं श्रुतभाजनं वन्दे ॥

End:

एवमभिष्टुवतो मे ज्ञानानि समस्तलोकचक्षूंषि ।
लघु भवताज्ज्ञानर्द्धिर्ज्ञानफलं सौख्यमच्यवनम् ॥

* * * *

सिग्घञ सुदगाहं जिनवर वसहापयरयत्तु ॥

No. 9511. श्रेयःपञ्चकम्.
ŚRĒYAḤPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 52*a* of the MS. described under **No. 8734,** wherein this work has been omitted to be included in the list of other works given therein.

Complete.

These five stanzas are in praise of the eleventh Tirthaṅkara, Śrēyāṁsanātha or Śrēyas.

Beginning:

श्रेयान् जिनः श्रेयसि वर्त्मनीमाः श्रेयः प्रजाः शासति जेयवाक्यः ।
भवांश्चकाशे भुवनत्रयेऽस्मिन् एको यथा वीतघनो विवस्वान् ॥

End:

एकान्तदृष्टिप्रतिषेधसिद्धिर्न्यायेषुभिर्मोहरिपुं निरस्य ।
असि स्म कैवल्यविभूतिसम्राडतस्त्वमर्हन्नसि म(नः)स्तवार्हः ॥

No. 9512. षट्कर्मस्तवः.
ṢAṬKARMASTAVAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 48*b* of the MS. described under No. 8746.

Complete.

Deals with the attainment of the undermentioned six magical powers:—(१) वश्य, (२) आकर्षण, (३) शान्ति, (४) इष्टचलन, (५) द्वेष, (६) स्तम्भन.

Beginning:

नमस्कृत्य चिदानन्दं जिनेन्द्रं त्रिजगत्प्रभुम् ।
वश्यादिमन्त्रषट्कर्म सा(स्तो)त्रव्याजेन वक्ष्यते ॥

दिङ्मुद्रासनकालपल्लवमणिध्यानादिभेदं यदा
विज्ञेयाखिलमन्त्रपादरचनामारभ्यमाणः पुमान् ।
वश्याकर्षणशान्तिमिष्टचलनाद्वेषान्तकस्तम्भना-
न्यारात् श्रीजिनराज ते च महिमा कर्तुं प्रवीणो भवेत् ॥

End:

इत्थं षट्कर्मभावांखिजगदधिपतीन्यत्परिज्ञानमुद्रां
सम्यक्तं मोचयन्ते प्रतिदिनमनघं भव्यसंपूजितानाम् ।
तांस्तान्मन्त्रप्रयोगान् जिनमहिमयुतान्निष्ठितान् साधयन्ति
लक्ष्मीं धर्मार्थकामं स्थिरविभवयुतां संपदं प्राप्नुवन्ति ॥

Colophon:

इति षट्कर्मस्तोत्रं (संपूर्णम्) ॥

No. 9513. सर्वदेवताजयमाला.

SARVADĒVATĀJAYAMĀLĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 94*b* of the MS. described under No. 8747.

Complete.

Herein the supplicant prays for the welfare and continuous existence of Jainism and pronounces benedictions on its principles as well as on the Jaina saints and gods.

Beginning:

श्रीमज्जिनेन्द्रान् वरसिद्धसूरीन् श्रीपाठकार्यान् वरसर्वसाधून् ।
श्रीजिनधर्मं वरशास्त्रबिम्बान् श्रीचैत्यगेहान् प्रणमामि नित्यम् ॥

End:

जय जय जिनसिद्धान् सूर्युपाध्यायसाधून्
जय जय जिनधर्मान् शास्त्रबिम्बालयाख्यान् ।

जय जय जिनसम्यग्दर्शनज्ञानवृत्तं
जय जय जगदीशं जैननित्यप्रकाशम् ॥

Colophon:

इति सर्वदेवताजयमाला ॥

No. 9514. सिद्धभक्तिः.
SIDDHABHAKTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 13*b* of the MS. described under No. 8734.

Complete.

A number of stanzas in devotional praise addressed to Jaina Siddhas.

Beginning:

सिद्धानुद्धूतकर्मप्रकृतिसमुदयान् साधितात्मस्वभावान्
वन्दे सिद्धिप्रसिद्ध्यै तदनुपमगुणप्रग्रहाकृष्टितुष्टः ।
सिद्धिः स्वात्मोपलब्धिः प्रगुणगुणगणाच्छादिदोषापहारा-
द्योग्योपादानयुक्त्या दृषद इह यथा हेमभावोपलब्धिः ॥

End:

नार्थः क्षुत्तृड्विनाशाद्विविधरसयुतैरन्नपानैरशुच्या
नास्पृष्टेर्गन्धमाल्यैर्न हि मृदुशयनैर्ग्लानिनिद्राद्यभावात् ।
आतङ्कार्तेरभावे तदुपशमनसद्भेषजानर्थभावा-
द्दीपानर्थक्यवद्वा व्यपगत(ति)मिरे दृश्यमाने समस्ते ॥

तादृक्संपत्समेता विविधनयतपः . . . .
चर्यासिद्धाः समन्तात्प्रविततय(श)सो विश्वदेवादिदेवाः ।
भूता भव्या भवन्तः . . . . . . स्तूयमाना विशिष्टैः
तान् सर्वान्नौम्यनन्तान्निजिगमि(दि)षुरहं तत्स्वरूपं त्रिसन्ध्यम् ॥

No. 9515. सिद्धभक्तिः.
SIDDHABHAKTIḤ.

Pages, 4. Lines, 6 a page.
Begins on fol. 55*a* of the MS. described under No. 8735.
Complete.
Similar to the above.

Beginning:

यस्यानुग्रहतो दुराग्रहपरित्यक्तात्मरूपात्मनः
सद्द्रव्यं च वदेत्रिकालविषयं स्वैः स्वैरमीदणं गुणैः ।
सार्थव्यञ्जनपर्ययैः समवयज्ञानातिबोधैः समं
तत्सम्यक्त्वमशेषकर्मभिदुरं सिद्धाः परं नौमि वः ॥

End:

प्रक्षीणे मणिमन्म(निर्म)ले सुमहसः स्वात्मप्रकाशात्मके
मज्जन्तो निरुपाख्यमोघचिदचिन्मोक्षार्थितीर्थक्षिपः ।
कृत्वानाद्यपि जन्म सान्द्रमपरं नाथस्यनन्तश्रिता
सद्दृग्बे नयवृत्तसंयमतपःसिद्धाः सदा पान्तु वः ॥

Colophon:

इति सिद्धभक्तिविधानम् ॥

* * * *

अनन्तानन्तसंसारसंततिच्छेदकारणम् ।
जिनराजपदाम्भोजस्मरणं शरणं मम ॥

No. 9516. सिद्धभक्तिकायोत्सर्गः.
SIDDHABHAKTIKĀYŌTSARGAḤ.

Pages, 4. Lines, 7 on a page.
Begins on fol. 12*a* of the MS. described under No. 8734.
In description of a process of Jaina worship with a view to obtain soul-deliverance.

Beginning:

अथ पौर्वाह्णिकदेववन्दनायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं त्रि-लोकजिनचैत्यालयं भावपूजावन्दनास्तवसमेतं श्रीसिद्धभक्तिकायोत्सर्गं करो-

म्यहम् । णमो अर्हत्ताणं णमो सिद्धाणं णमो आआरिआणं णमो उवज्झाआणं णमो कोटिसव्वुसाहूणं चत्तारि मङ्गलं ।

अर्हत्ता मङ्गलं सिद्धामङ्गलं साहुमङ्गलं ।

* * * *

ओं नमः परमात्मने नमोऽनेकान्ताय शान्तये ।

दोसामिघज्जिणवरे तिइअरिकवग्गि अणन्तजिणे ।

णरपवरणाअवहिअे विहुवरअमगे महापण्णे ॥

End:

द्वित्रिचतुरिन्द्रियाः प्राणा भूतास्ते तरवः स्मृताः ।

जीवाः पचेन्द्रिया ज्ञेयाः शेषाः सत्त्वाः प्रकीर्ताः(र्तिताः) ॥

सिद्धिं मम दिशन्तु ॥

No. 9517. सुपार्श्वपञ्चकम्.

SUPĀRŚVAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 516 of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the seventh Tīrthaṅkara named Supārśvanātha.

Beginning:

स्वास्थ्यं यदात्यन्तिकमेव पुंसां स्वार्थो न भोगः परिभङ्गुरात्मा ।

तृषानुषङ्गान्न च तापशान्तिरितीदमाख्यद्भगवान् सुपार्श्वः ॥

End:

सर्वस्य तत्त्वस्य भवान् प्रमाता मातेव बालस्य हितेऽनुशास्ता।

गुणावलोकस्य जिनस्य नेता मयातिभक्त्या परिणूयसेऽद्य ॥

No. 9518. सुमतिपञ्चकम्.
SUMATIPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 51*a* of the MS. described under No. 8734 wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of Sumatinātha, who is considered to be the fifth of the Tīrthaṅkaras.

Beginning :

अन्वर्थसंज्ञः सुमति(र्जिनेशः)स्वयं मतं येन सुयुक्ति नीतम् ।
यतश्च शेषेषु मतेषु नास्ति सर्वक्रियाकारकतत्त्वसिद्धिः ॥
अनेकमेकं ज(ग)ती(श)तत्त्वं भिदान्वयज्ञानमिदं हि सत्यम् ।
मृषोपचारोऽन्यतरस्य लोपे तच्छेषलोपोऽपि ततोऽनुपाख्यम् ॥

End :

विधिं निषेधं च कथंचिदिष्टौ विवक्षया मुख्यगुणव्यवस्थाः ।
इति प्रणीतिः सुमतेस्त्वयं(सन्)मतिप्रवेकं स्तुवतोऽस्तु नाक्षः ॥

No. 9519. सुविधिपञ्चकम्.
SUVIDHIPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 52*b* of the MS. described under No. 8734, wherein this work is omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the ninth Tīrthaṅkara called Suvidhinātha *alias* Puṣpadanta.

Beginning :

एकान्तदृष्टिप्रतिषेधितत्त्वं प्रमाणसिद्धं तदतत्स्वभावम् ।
त्वया प्रणीतं सुविधे स्वदा(धा)म्ना नैतत्समालीढपदं त्वदन्ये ॥

End :

गुणप्रदानार्थमिदं हि वाक्यं जिनस्य ते त्वद्विषतामपथ्यम् ।
ततोऽभिवन्द्यं जगदीश्वराणां ममापि साधोस्तव पादपद्मम् ॥

No. 9520. स्वप्नस्तवः.
SVAPNASTAVAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 77*a* of the MS. described under No. 8734, wherein this work has been stated to begin on fol. 74*a* in the list of other works given therein.

Complete.

Describes the nature of the dreams dreamt by the mother of Vṛṣabha, the first Tīrthaṅkara, at the time when she conceived him. It is stated that the due repetition of these stanzas contained in this work is efficacious in dispelling bad dreams, in obtaining salvation, etc.

Beginning :

गजेन्द्रवृषसिंहपोतकमलाल्यादामकं
शशाङ्करविमीनकुम्भनलिनाकराम्भोनिधि ।
मृगाधिपसृतासनं सुरविमाननागालयं
मणिप्रचयवह्निना सह विलोकितं मङ्गलम् ॥

श्रीमति गुणैरुदारे भगवति भरतस्य पितरि लोकहितो यः ।
स्वामिनि दिवौकसो भुवमागच्छति सर्वलोकगुरुवृषभजिने ॥

End :

संसारतरणकारणमशेषदुःस्वप्नहरणं सद्यः ।
सुस्वप्नवर्धनं खलु सदर्थसंसिद्धिकरणमिति बहुभक्त्या ॥
स्वप्नस्तवमिममनिशं प्रभातसमये पठन्ति ये शृण्वन्ति ।
ते परबोधिसमाधिं सम्यग्दर्शनविशुद्धिमपि च लभन्ते ॥

No. 9521. स्वप्नस्तवः.
SVAPNASTAVAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 13*b* of the MS. desrcribed under No. 8746.

Complete.

Same work as the above.

(8) NADĪ.

No. 9522. नदीस्तोत्रम्.
NADĪSTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 115.

Complete.

In praise of certain sacred rivers such as the Ganges, the Yamunā (the Jumna), the Sarasvatī, etc., and said to have been composed by Vyāsa. The repetition of this Stōtra in the morning, especially at the time of bathing, is held to be efficacious in removing one's sins.

Beginning:

नदीस्तोत्रं प्रवक्ष्यामि सर्वपापविनाशिनी ।
भागीरथी वारणासी यमुना(च) सरस्वती ॥
फल्गुनी नीलभद्रा(च) नर्मदा गण्डकी तथा ।
मणिकर्णी गोमवती प्रयागी(गे)ति पुनः पुनः ॥

End:

प्रातःकाले पठेन्नित्यं स्नानकाले विशेषतः ॥
कोटिजन्मकृतं पापं दद्या(हन्या)त् पापसहस्रकम् ।
ब्रह्महत्यादिसर्वेषु मम पातकनाशनम् ॥

Colophon:

इति श्रीव्यासोक्तं नदीस्तोत्रं संपूर्णम् ॥

No. 9523. नदीस्तोत्रम्.
NADĪSTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 51*a* of the MS. described under No. 2964, wherein this work has been mentioned as Mahānadīstōtra in the list of other works given therein.

Complete.

Same work as the above.

No. 9524. नदीस्तोत्रम्.

NADĪSTŌTRAM.

Pages, 3. Lines, 11 on a page.

Begins on fol. 15*a* of the MS. described under No. 2371.

Complete; as found in the Brahmāṇḍapurāṇa.

Similar to the above.

The transcription of this manuscript is said to have been completed on Sunday, the eleventh day of the bright fortnight of the month of Mārgaśirṣa, in the year Virōdhi.

Beginning:

नदीस्तोत्रं प्रवक्ष्यामि सर्वपापप्रणाशनम् ।
भागीरथी वारणाशी यमुना च सरस्वती ॥

फल्गुनी शोणभद्रा च नर्मदा मणिकर्णिका ।
कुमुद्वती गोमवती प्रयागा गण्डकी तथा ॥

गया प्रयागसरयू त्रिवेणी मणिकर्णिका ।
कृष्णवेणी भीमरथी गौतमी भवनाशिनी ॥

पम्पा हैमवती चैव वरदा च कुमुद्वती ।
वेत्रावती वेगवती गायत्री कौशिकी तथा ॥

End:

केतुर्वातपुरी चिदम्बरसभा गोकर्णपम्पामुखी
श्वेतारण्यवटाटले(वी) स्तुतिपुरं शोणाद्रिवृद्धाचलम् ।
काशी श्री(सुत)कालहस्तिनगरी केदारवाराणसी
कैलासो गिरिशङ्करस्य निलयं प्रख्यातिमुख्यस्थलम् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे नदीस्तोत्रं संपूर्णम् ॥

No. 9525. नदीस्तोत्रम्.
NADĪSTŌTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 208a of the MS. described under No. 5661, wherein this work has been mentioned as Mahānadīstōtra in the list of other works given therein.

Complete.

Same work as the above.

No. 9526. नदीस्तोत्रम्.
NADĪSTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 1b of the MS. described under No. 5978.

Complete.

Similar to the above.

Beginning:

नदीस्तोत्रं प्रवक्ष्यामि सर्वा नद्यः प्रकाशते (चकासति) ।
भागीरथी वारणाशि(सी) यमुना च सरस्वती ॥
फल्गुनी शोणभद्रा(च) नर्मदा गण्डकी तथा ।
गया प्रयागसरयू त्रिवेणी मणिकर्णिका ॥
कृष्णवेणी भीमरथी गौतमी भवनाशिनी ।
अनघाळी मेरुगङ्गा तुङ्गभद्रा मलापहा ॥

End:

प्रातःकाले पठेन्नित्यं स्नानकाले विशेषतः ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ॥
ब्रह्महत्यादिपापघ्नं पुत्रपौत्राभिवर्धनम् ।
इह लोके सुखप्राप्तं(सः) विष्णुसायुज्यमाप्नुयात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे सर्वनदीस्तोत्रं संपूर्णम् ॥

No. 9527. नदीस्तोत्रम्.
NADĪSTŌTRAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 69*a* of the MS. described under No. 120, wherein this work has been mentioned as Bhāgīrathīstava in the list of other works given therein.

Complete.

Similar to the above.

Beginning:

पिप्पलादसमुत्पन्ने कृत्ये लोकभयंकरि ।
पाषाणं ते मया दत्तमाहारार्थं प्रकल्पय ॥
सकृन्नारायणेत्युक्त्वा पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्वतीर्थेषु स्नातो भवति पुत्रक ॥

* * * *

पुष्यर्क्षे जन्मनक्षत्रे व्यतीपाते दिनत्रयम् ।
सकृद्गोदावरीस्नानं कुलकोटिं समुद्धरेत् ॥

End:

तिस्रः कोट्यर्धकोट्यश्च तीर्थानि भुवनत्रये ।
आयान्तु गौतमी गङ्गां गृहाणार्घ्यं नमोऽस्तु ते ॥
दण्डकमण्डलुसंभूते पूर्णचन्द्रनिभानने ।
त्रैलोक्यपावनी गङ्गा गृहाणार्घ्यं नमोऽस्तु ते ॥

No. 9528. यमुनास्तोत्रम्.
YAMUNĀSTŌTRAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 89*b* of the MS. described under No. 2981, wherein this work has been mentioned as Yamunāvijñapti in the list of other works given therein.

Complete.

In praise of the river Yamunā which is considered to be intimately associated with Śrīkṛṣṇa: by Haridāsa.

Beginning:

कृष्णां कृष्णसमां रूपां कृष्णकृष्णरसात्मिकाम् ।
कृष्णलीलामृतजलां कृष्णसंबन्धकारिणीम् ॥
कृष्णप्रियां कृष्णमुख्यरससङ्गमदायिनीम् ।
कृष्णक्रीडाश्रयां कृष्णपदवीप्रापिकामपि ॥

End:

नमामि यमुनां कृष्णतुर्यप्रियतमामहम् ।
निजाचार्यपदाम्भोजदासभावं प्रयच्छतु ॥

Colophon:

इति श्रीहरिदासोदिता यमुनाविज्ञप्तिः ॥

---

(9) NAVAGRAHA.

No. 9529. नवग्रहमङ्गलाष्टकम्.
NAVAGRAHAMAṄGALĀṢṬAKAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 95*a* of the MS. described under No. 1167.

Complete.

Eight stanzas in praise and propitiation of the nine planets: stated to be by Kālidāsa.

Beginning:

भास्वान् काश्यपगोत्रजोऽरुणरुचिर्यः सिंहपोऽर्कः समित्-
षट्त्रिस्थो दशशोभनो गुरुशशी भौमः सुमित्रः सदा ।
शुक्रो मन्दरिपुः कलिङ्गजनितश्चाग्नीश्वरो देवता
मध्ये वर्तुलपूर्वदिग् दिनकरः कुर्यात् सदा मङ्गलम् ॥

End:

इत्येतद्ग्रहमङ्गलाष्टकमिदं पापौघविच्छेदनं
पुण्यं संप्रति कालिदासकविना नित्यं प्रबन्धीकृतम् ।

प्रातर्यस्तु पठेत् समाहितधिया विद्याशया सेवया
गङ्गासागरसंगमे प्रतिदिनं स्नात्वा फलं लभ्यते ॥

No. 9530. नवग्रहस्तोत्रम्.

NAVAGRAHASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 6459

Complete.

Similar to the above: stated to be by Vyāsa.

The good results said to arise from a repetition of this Stōtra in the morning are described in the concluding two stanzas.

Beginning:

पद्मोद्भवं वेदनिधिं पुराणं ब्रह्माणमीशं जगतः प्रणम्य ।
स्तोत्रं प्रवक्ष्ये प्रयतो ग्रहाणां येन स्तुतास्तुष्टिकरा भवन्ति ॥

दिवाकरं दीप्तसहस्ररश्मिं तेजोमयं जगतः कर्मसाक्षिम् ।
हंसं भानुं सूर्यमादिं ग्रहाणां रविं सदा शरणमहं प्रपद्ये ॥

End:

ये ब्रह्मपुत्रा ग्रहभावेण युक्ता ब्रह्मोद्भवा ब्रह्म विदुः कुमाराः ।
ब्रह्मोत्तमा वरदा जामदग्न्याः केतुं सदा शरणमहं प्रपद्ये ॥

तारागणाः केतवो रौहिणेयाः सप्तऋषयः ससदा दीप्यमानाः ।
उल्कापाता विद्युतश्चोष्णपादा ज्योतिर्गणाः सन्तु नः सुप्रसन्नाः ॥

इमं स्तवं व्यासमुनिप्रणीतं ये श्रद्धया प्रातःकाले पठन्ति ।
तेषां ग्रहा विषमस्थातिघोरा एकादशस्था[:फलदा]वरदा भवन्ति ॥

आयुष्यं विद्यां च तथा सुखं च धर्मार्थलाभं बहुपुत्रतां च ।
शत्रुक्षयं राजसु पूजनं सदानुग्रहाः सर्वकालं भवन्ति ॥

No. 9531. नवग्रहस्तोत्रम्.
NAVAGRAHASTÔTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 8a of the MS. described under No. 8609, wherein this work is stated to begin on fol. 10a in the list of other works given therein.

Complete.

Same work as the above.

No. 9532. नवग्रहस्तोत्रम्.
NAVAGRAHASTÔTRAM.

Substance, palm-leaf. Size, 13¾ × 1½ inches. Pages, 5. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 14a. The other works herein are Jyautiṣaviṣaya 1a, Navagrahamantra 16a.

Complete.

Same work as the above, but without Phalaśruti.

No. 9533. नवग्रहस्तोत्रम्.
NAVAGRAHASTÔTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 5938.

Complete.

Same work as the above.

No. 9534. नवग्रहस्तोत्रम्.
NAVAGRAHASTÔTRAM.

Substance, palm-leaf. Size, 15 × 1¾ inches. Page, 1. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 24b. The other works herein are Stôtraratna 1a, Śriguṇaratnakôśa 4b, Kṣamāṣôḍaśī 9a, Catuśślôkī 10b, Dêvarājāṣṭaka 1 a, Varavaramunidinacaryā 11a, 13b, Yatirājavimśati

12*b*, Aṣṭaślōkī 15*a*, Kūrēśavijaya 15*b*, Varadarājastava 17*a*, Jitantēstōtra 23*b*, Pañcāyudhastōtra 24*a*, Rāmānujasuprabhāta 25*a*, Haryaṣṭaka 26*a*, Gōvindadarśana 26*b*, Kṛṣṇāṣṭaka 27*a*, Mukundāṣṭaka 27*b*, Paramārthastuti 28*a*, Haricintana 28*b*, Varavaramunyudbōdhana 28*b*, Mukundamālā 30*a*, Sarvārthasārasaṅgraha 33 (Telugu).

Complete.

Same work as the above, but without the introductory and the benedictory stanzas.

No. **9535**. नवग्रहस्तोत्रम्.

NAVAGRAHASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 203*a* of the MS. described under No. 5661.

Complete.

Similar to the above.

Beginning:

अस्य श्रीनवग्रहस्तोत्रमन्त्रस्य अनुष्टुप् छन्दः, श्रीवेदव्यासभगवान् ऋषिः, नवग्रहा देवताः, समं सर्वारिष्टगतिनिवृत्तिद्वारा शुभस्थानफलसिद्ध्यर्थे जपे विनियोगः।

नमस्सूर्याय सोमाय मङ्गलाय बुधाय च।
गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः॥

व्यास उवाच—

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्।
तमोघ्नं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥
इति व्यासमुखाद्भूतं यः पठेत्सततं नरः॥
दिवा वा यदि वा रात्रौ ग्रहशान्तिर्भविष्यति।
ते सर्वे प्रशमं यान्ति व्यासोद्भूतं न संशयः॥

End:

आयुश्च विद्या सततं सुखं च धर्मार्थलाभो बहुपुत्रलाभः।
शत्रुक्षयं राजसु पूजितं च भवेत्सदा तुष्टिकरं नराणाम्॥

Colophon:

नवग्रहस्तोत्रं संपूर्णम् ॥

No. 9536. नवग्रहस्तोत्रम्.
NAVAGRAHASTÔTRAM.

Pages, 3. Lines, 16 on a page.

Begins on fol. 105*a* of the MS. described under No. 5568, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

Same work as the above, but without the mention of Ṛṣi, Chandas and Dêvatā and with a different Phalaśruti as given below:—

सर्ववश्यं जगत्पूज्यं संग्रामे जयवर्धनम् ।
सर्वारम्भाश्च सिध्यन्ति गुरोर्वचनमीदृशम् ॥

No. 9537. नवग्रहस्तोत्रम्.
NAVAGRAHASTÔTRAM.

Substance, palm-leaf. Size, 17¾ × 1⅜ inches. Pages, 2. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 36*a*. The other works herein are Jātakacandrikāvyākhya 1*a*, Jātakanirṇaya 16*a*, Praśnaphalanirṇaya 37*a*.

Complete.

Similar to the above.

Beginning:

पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥

End:

धूम्रो द्विबाहुर्वरदो गदाभृत् गृध्रासनस्थो विकृताननश्च ।
किरीटकेयूरविभूषिताङ्गः स चास्तु मे केतुगणः प्रशान्तः ॥
सूर्यं सोमं कुजं सौम्यं गुरुं शुक्रं शनैश्चरम् ।
राहुकेतु ग्रहान् सर्वा(न्) नमामि ग्रहनायका(न्) ॥

No. 9538. नवग्रहस्तोत्रम्.
NAVAGRAHASTÔTRAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 425 of the MS. described under No. 8754, wherein this work has been mentioned as Maṅgalastôtra in the list of other works given therein.

Complete.

This Navagrahastôtra is intended to be repeated by Jainas.

Beginning :

श्रीमानसादिनिधने जिनवासयुक्ते
सिंहे च गोपतितुरङ्गसुरोभमाने ।
बिम्बे वसन्निव निशादिवसुमसूर्य-
सूर्यः सुसौख्यमनिशं भवतां तनोतु ॥

सूर्यः सुप्रीतो वरदो भवतु ।

End :

आरोग्यं पद्मबन्धुर्वितरतु भवतां संपदं शीतभानुः
भूलाभं भूमिपुत्रः सकलगुणनिधिं वाग्विभूतिं च सौम्यः ।
सौभाग्यं देवमन्त्री रिपुमृतिशमनो भार्गवः शौर्यमार्किः
दीर्घायुः सैंहिकेयो विपुलतरयशः केतुरिष्टार्थसिद्धिम् ॥

सर्वे ग्रहाः सुनक्षत्रा एकादशस्थानफलदा वरदा भवन्तु ॥

Colophon :

मङ्गलस्तोत्रं समाप्तम् ॥

---

(10) PARABRAHMA.

No. 9539. त्रिमूर्तिस्तोत्रम्.
TRIMÛRTISTÔTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 66*a* of the MS. described under No. 430.

Complete.

In praise of the Hindu trinity, *i.e.*, Brahma, Viṣṇu and Śiva. Vināyaka and Kandarpa (the god of love) are also praised in the beginning and end respectively.

Beginning :

हेरम्बो जगदम्बिकाप्रियसुतः श्रीमान्प्रलम्बोदरो
देवो हास्यरसाधिपः करिमुखः कर्णाञ्चले शोभितः ।
निघ्नन् विघ्नचयं च यो मम रिपुस्तोमं च हेमाम्बुजा-
सीनः सोमकलाधरः स भवतां दिश्यात्सदा मङ्गलम् ॥
श्रीशः क्लेशहरो हरिर्मणिगणो वाचाभिरामाकृतिः
गोविन्दो गरुडध्वजो मधुरिपुः श्रीवत्सलक्ष्माच्युतः ।
शार्ङ्गी चक्रधरः पुराणपुरुषः शेषाहितल्पो हरिः
देव्या देवशिखामणिः स भवतां दिश्यात्सदा मङ्गलम् ॥
श्रीमान्सोमकलाधरो धरणिभृत्कन्याधवः शंकरः
कारुण्यैकनिधिः कपर्दविलसद्गङ्गातरङ्गोज्ज्वलः ।
राजद्राजतशैलरत्नशिखरासीनः सुरेज्यादिभिः
स्तुत्यो नित्यमनोरथः स भवतां दिश्यात्सदा मङ्गलम् ॥
लक्ष्मीवल्लभफुल्लनाभिसरसीपङ्केरुहान्तर्भवो
भाषायोषिदशेषगात्रसुषमाहोमप्रियंभावुकः ।
चित्रानल्पविकल्पकल्पितमहच्छिल्पानुकल्पाकृतिः
सर्वज्ञश्चतुराननः स भवतां दिश्यात्सदा मङ्गलम् ॥

End :

श्रीकान्ताप्रियनन्दनो मनसिजः शृङ्गारदीक्षागुरुः
शूरः पञ्चशरः स्मरः शरभृतामग्रेसरो भासुरः ।
मीनाङ्को मधुमासबन्धुरबलासैन्यः प्रसूनायुधः
कन्दर्पो रतिवल्लभः स भवतां दिश्यात्सदा मङ्गलम् ॥

No. **9540.** परानन्दस्तवः.
PARĀNANDASTAVAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 97*b* of the MS. described under No. 119.
Complete.
In praise of the Supreme Brahman who is all bliss.

Beginning:

यदाहुर्वेदान्तेष्वजममरमद्वैतममृतं
यदन्तः पश्यन्ति प्रयतमनसः केऽपि कृतिनः ।
निजं यश्चैतन्यं पुरमथन तद्रूपममलं
परानन्दं वन्दे भुवनतरुकन्दस्य भवतः ॥

End:

अजममरमनन्तं शान्तमत्यन्तशुद्धं
शिवमणु परमेशं निष्प्रपचं निरीशम् ।
त्रिभुवनतरुकन्दं सच्चिदानन्दरूपं
भवमभयमभेद्यं स्वात्मवेद्यं नमामि ॥
परानन्दस्तुतिमिमां . . . . ।
यत्पुण्यमन्ते तेनास्ति जगतात्महितोन्मुखम् ॥

Colophon:

परानन्दस्तवं(वः) संपूर्णम्(ः) ॥

No. **9541.** ब्रह्मपारस्तोत्रम्.
BRAHMAPĀRASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 72*a* of the MS. described under No. 757.
Complete; as found in the Viṣṇupurāṇa.
Similar to the above.

Beginning:

अस्य श्रीब्रह्मपारस्तोत्रमन्त्रस्य कण्डुः ऋषिः, ब्रह्मा देवता, त्रिष्टुप्

छन्दः, मम कालातिक्रमणप्रायश्चित्तार्थे कर्मलोपप्रायश्चित्तार्थे जपे विनियोगः ।

प्रचेतस ऊचुः—

ब्रह्मपारं मुने श्रोतुमिच्छामः परमं स्तवम् ।
जपता कण्डुना देवो येनाराध्यत केशवः ॥

सोम उवाच—

पारं परं विष्णुरपारपारः परः परेभ्यः परमार्थरूपी ।
स ब्रह्मपारः परपारभूतः परः पराणामपि पारपारः ॥

End:

एतद्धि ब्रह्मपाराख्यं यः स्तवं परमं जपन् ।
अपापः परमां सिद्धिं स समाराध्य केशवम् ॥
इमं स्तवं यः पठते शृणुयादपि नित्यशः ।
स कामदोषैरखिलैर्वियुक्तो भवति ध्रुवम् ॥

Colophon:

इति श्रीविष्णुपुराणे ब्रह्मपारस्तोत्रं संपूर्णम् ॥

No. 9542. ब्रह्मपारस्तवः.

BRAHMAPĀRASTAVAḤ.

Substance, paper. Size, $6\frac{1}{4} \times 4\frac{1}{4}$ inches. Pages, 2. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 3*a*. The other works herein are Manīṣāpañcaka 1*a*, Viṣṇustōtra 4*a*, Tattvōpadēśa 6*a*.

Complete.

Same work as the above, but without the mention of Ṛṣi, Chandas and Dēvatā.

No. 9543. सोपानपञ्चकम्.
SŌPĀNAPAÑCAKAM.

Pages, 2. Lines, 22 on a page.

Begins on fol. 66 of the MS. described under No. 1021.

Complete.

Five stanzas showing step by step as to what should be done by a person for the attainment of salvation.

Beginning:

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसंधीयता-
मात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥

End:

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा तु समीक्ष्यतां जगदिदं संबाधितं दृश्यताम् ।
प्राकर्म (प्र)विलाप्यतां चितिबलान्नाप्युत्त(प्यात्तु)रैः शि(श्लि)ष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥

Colophon:

इति सोपानपञ्चकं समाप्तम् ॥

---

(11) NANDI AND BASAVA.

No. 9544. बसवगद्यम्.
BASAVAGADYAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 136*a* of the MS. described under No. 781, wherein this work has been mentioned as Pañcaprakāragadya in the list of other works given therein.

Complete.

A number of rhythmic prose passages in praise of Basava, the founder of the Lingait sect. He was the prime-minister at the court of Bijjala at Kalyāṇa, and in the Basavapurāṇa his life is narrated at length. He is considered to be an incarnation of Śiva's bull.

Beginning :

स्वस्ति श्रीप्रमथान्वयोत्तमशिलादश्रीमुनीन्द्रात्मज

श्रीकण्ठप्रतिबिम्बमूर्तिरनघ श्रीनन्दिनाथा वि(ब प्र)भो ।

तस्यांशोद्भव दण्डनाथ बसवश्रीनामधेय प्रभो

त्वत्कारुण्यतरङ्गितं मयि सदा निक्षिप्यतामीक्षणम् ॥

जय जय बसव श्रीमन्महावृषमेन्द्रापरा(व)तार समचितवीरमहेश्वराचार सारप्रमथगणालंकार जगत्त्रयाधार देव बसव ।

End :

जय गतदूषण जय नुतभाषण जय गुणराजित जय गणपूजित जय जय श्रीबस(व) दण्डा(धि)नाथ नमस्ते नमः ॥

Colophon :

पञ्चप्रकारगद्यं संपूर्णम् ॥

No. **9545.** बसवगद्यम्.

BASAVAGADYAM.

Substance, palm-leaf. Size, 14 × 1⅜ inches. Pages, 9. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 7*a*. The other works herein are Basavastōtra 1*a*, Vṛṣabhaṣṭaka 6*a*, Basavanamaskāragadya 11*b*, Basavamuktapadagrastagadya 15*a*, Basavākṣaramālāgadya 15*b*.

Complete.

Same work as the above.

Colophon :

पञ्चप्रकारगद्यं संपूर्णम् ॥

No. **9546.** बसवपञ्चरत्नम्.

BASAVAPAÑCARATNAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 176*a* of the MS. described under No. 119.

Complete.

Similar to the above. By Sōmanātha.

Beginning:

प्रियतमशिवभक्ता बिन्दुनादानुरक्ता
मयि भव शिवभक्ताहारहीरप्रमक्ता ।
नियमितसकलाङ्गा नीलकण्ठप्रसङ्गा
नयतु बसवलिङ्गा धीरभक्तिक्रियाङ्गा ॥

End:

परिहृतपरिवादा भक्तिसेवाविनोदा
भरितनिखिलवेदा भर्गसेवाविनोदा ।
त्रिभुवनरमणीया देवसंभावनीया
नय नय बसवार्या संततश्लाघनीया ॥
श्रीमते वृषभेन्द्राय सोमनाथेन धीमता[म्] ।
पञ्चरत्नमिदं स्तोत्रं ज्ञानवैराग्यभक्तिता(द)म् ॥

Colophon:

इति बसवपञ्चरत्नं सम्पूर्णम् ॥

No. **9547.** बसवपञ्चरत्नम्.
BASAVAPAÑCARATNAM.

Pages, 2. Lines, 5 on a page.
Begins on fol. 19*a* of the MS. described under No. 5422.
Complete.
Similar to the above.

Beginning:

नरसुरवरधीरा नन्दिकेशावतारा
विषमविषयदूरा विश्वलोकैकसारा ।
गंतंकमल्लुसङ्गा ख्यातगोष्ठीप्रसङ्गा
शरणबसवलिङ्गा सज्जनाम्भोजभृङ्गा ॥

See under the previous number for the end.

No. 9548. बसवपञ्चरत्नम्.
BASAVAPAÑCARATNAM.

Pages, 2 Lines, 4 on a page.

Begins on fol. 9*a* of the MS. described under No. 6817, wherein this work has been mentioned as Basavēśvarastōtra in the list of other works given therein.

Incomplete.

Same work as the above.

No. 9549. बसवनमस्कारस्तोत्रम्.
BASAVANAMASKĀRASTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 138*b* of the MS. described under No. 781, wherein this work has been mentioned as Namaskāragadyam in the list of other works given therein.

Complete.

Stanzas of salutation addressed to Basava, the founder of the Lingait sect.

Beginning:

श्रीकण्ठोद्भव वेदबोधितलसद्वीरव्रतप्रक्रिया-
चर्यादेशिकदेशिकाय भुवनस्तुत्याय नित्याय ते ।
सद्ब्राण्डा[गा]रधुरंधराय सुमहद्रुद्राय भद्राय ते
साक्षाच्छ्रीवृषभाधिपांश बसवाधीशाय तस्मै नमः ॥

End:

संगतशिवयोगाङ्गाय नमो भक्तिप्रशमनानङ्गाय नमः ।
तुङ्गमङ्गलसंगप्रसंगसंगत श्रीबसवलिङ्गाय ते नमस्ते नमस्ते नमः ॥

Colophon:

श्रीनमस्कारगद्यं संपूर्णम् ॥

No. 9550. बसवनमस्कारस्तोत्रम्.
BASAVANAMASKĀRASTŌTRAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 11*b* of the MS. described under No. 9545.

Complete.

Same work as the above.

No. 9551. बसवमुक्तपदग्रस्तस्तोत्रम्.
BASAVAMUKTAPADAGRASTASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 140*b* of the MS. described under No. 781.

Complete.

Similar to the above. The peculiarity of this Gadya is that the last member of each compound word in the vocative case is repeated in the beginning of the next compound word.

Beginning:

अपि च सन्मुनिवृन्दवृन्दारकाशेष शेषशयनाब्जातजातमुनिविबुध-गण गणनाथवर्याय जपतपःशमनियमयमनिचितगुणनिवह वहमानशिवधर्म.

End:

घोरतरभवपाशमुक्ताय भक्ताय मघवत्प्रणीतपादाब्जाताय दूताय विध-(विध)संश्रिताशुभोद्धरणाय चरणाय बसवाय बसवाय नमः ॥

Colophon:

मुक्तपदग्रस्तं सम्पूर्णम् ॥

No. 9552. बसवमुक्तपदग्रस्तस्तोत्रम्.
BASAVAMUKTAPADAGRASTASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 9545.

Complete.

Same work as the above.

No. 9553. बसवमुक्तपदग्रस्तस्तोत्रम्.
BASAVAMUKTAPADAGRASTASTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 50*b* of the MS. described under No. 2418.

Complete.

Same work as the above, but with the addition of the following few lines in the end, wherein the work is said to have been composed by Palkūri Sōmanātha:—

नमो वृषभजाताय बसवाय नमो नमः ।
अष्टोत्तरशतचरणैर्बसवनमस्कारगद्यस्य ।
बसवेश्वरजपमाला रचि(ता) पाल्कुरिसोमाङ्क(मनाथेन) ॥

No. 9554. बसवस्तुतिः.
BASAVASTUTIḤ.

Substance, palm-leaf. Size, 14⅜ × 1¼ inches. Pages, 13. Lines, 4 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Complete.

Similar to the above.

Beginning:

श्रीतुहिनाद्रिजाधिप, अकारोकारमकारविन्दुनादातिशयात्मकप्रणवपूर्वकमाकलितोंनमःशिवायेतिभवन्मुखोद्भव, षडक्षरसंभव, तद्विलीनविख्यातपरस्पराद्यखिलवर्णनुत, बसवेश पाहि माम् ।

End:

क्षपितप्रतिपक्ष, सुरासुरक्ष्माङ्कुरितकटाक्षवीक्षण, क्षकारनुत, बसवेश पाहि माम् ॥

No. 9555. बसवस्तुतिः.
BASAVASTUTIḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 18*a* of the MS. described under No. 8717.

Incomplete.

Same work as the above.

No. **9556.** **बसवस्तुतिः.**
BASAVASTUTIḤ.

Pages, 9. Lines, 11 on a page.

Begins on fol. 33*a* of the MS. described under No. 120.

Complete.

Same work as the above.

No. **9557.** **बसवस्तोत्रम्.**
BASAVASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 6600.

Complete.

Similar to the above.

Beginning:

स्वस्ति परंज्योतिस्स्वरूप दिव्योहलिङ्गप्रभासंभूत(भू)तलसंभूत अन-(न्त)कोटिपुरातनमहाप्रमथगणनाथ नन्दिनाथ ।

End:

वृषभेश्वर महाकाय . . The remaining portions are in Telugu.

No. **9558.** **बसवस्तोत्रम्.**
BASAVASTŌTRAM.

Pages, 11. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9545.

Complete.

Same work as the above.

No. **9559.** **बसवाक्षरमालागद्यम्.**
BASAVĀKṢARAMĀLĀGADYAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 45*a* of the MS. described under No. 2418, wherein it is mentioned as Basavagadya in the list of other works given therein.

Complete.

In praise of Basava under various significant attributes, each of which begins with the successive letters of the alphabet: by Sōmanātha.

Beginning:

जय जय बसवाख्य स्वानुभूतैर्य(त्येक)सौख्य
प्रमथगणपवित्र प्रस्फुरद्भक्तिगोत्र ।
प्रण(णि)हितभुजगाढ्य प्रायदैश्वर्यधुर्य
प्रमितवृषभरूप भ्राजमानप्रताप ॥

अपिच(शेष)शिवशृङ्गार, आदिपदविस्तार, इहपरसुखाधार, ईषणात्रयादूर, उद्धतगुणोपेत, ऊर्ध्वरेतोजात, ऋषभनामख्यात ।

End:

हरगणसितच्छत्र, ळलितकीर्तिकलत्र, क्षरमुख, विस्तुतिपात्र, इति श्रीशिवश्रीबसवदण्डनाथ नमस्ते नमस्ते नमः ।

अकारादिक्षकारान्तमकाराद्यक्षमालिका ।
प्रसादे सोमनाथाख्यो बसवस्य कृपाम्बुधेः ॥

No. 9560. बसवाक्षरमालागद्यम्.
BASAVĀKṢARAMĀLĀGADYAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 141*b* of the MS. described under No. 781, wherein it is mentioned as Akṣaramālāgadya in the list of other works given therein.

Complete.

Same work as the above.

This manuscript work is said to have been copied by Jayavārana Mājēṭi Sarvēśaliṅga, the copying having been completed on the 5th day of the dark fortnight of the month of Phālguna in the year Plavaṅga.

No. 9561. बसवाक्षरमालागद्यम्.
BASAVĀKṢARAMĀLĀGADYAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 15*b* of the MS. described under No. 9545.

Complete.

Same work as the above.

No. 9562. बसवाक्षरमालागद्यम्.

BASAVĀKṢARAMĀLĀGADYAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 148 of the MS. described under No. 764, wherein this work has been mentioned as Mātṛkāśivagadha in the list of other works given therein.

Complete.

Same work as the above.

No. 9563. बसवाष्टकम्.

BASAVĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 177a of the MS. described under No. 119.

Complete.

Eight stanzas in praise of Basava.

Beginning :

जय जय बसवांशा सत्यसद्भक्तिवासा
जय जय शिवगोत्रा सत्प्रसादैकपात्रा ।
जय जय भवदूरा शाश्वदे(तै)काङ्गवीरा
जय जय बसवाख्या संविदाश्चर्यसौख्या ॥

End :

निरतिशयगभीरा नीम(निष्प)पञ्चप्रकारा
दुरिततरुकुठारा दुर्जनात्यन्तदूरा ।
परमगुणसमाजा प्रस्फुरद्भक्तिबीजा
शरण बसवराजा शाश्वतोदारतेजा ॥
बसवाष्टकमिदं पुण्यं सर्वपापप्रणाशनम् ।
यः पठेच्छृणुयाद्वापि शिवलोके महीयते ॥

No. 9564. बसवोदाहरणस्तोत्रम्.
BASAVŌDĀHARAṆASTŌTRAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 132*a* of the MS. described under No. 781, wherein this work has been mentioned as Udāharaṇagadyam in the list of other works given therein.

Complete.

This work in praise of Basava is written in a kind of poetic-prose composition known as Udāharaṇa. It consists mainly of eight stanzas, each of them illustrating the use of one of the eight declensional cases and being followed by two similarly composed passages in the Kalikā and the Utkalikā metres respectively. It is required that the whole piece should be concluded by two stanzas, one of them illustrating the use of all the eight cases and the other containing the name of the outhor. By Sōmakavi.

Beginning:

जयतु बसवराजः प्राणलिङ्गात्मपूजः शरणदिविजभूजस्मेरसंवित्सरोजः ।
गणपरिषदधीनः ख्यातदानावदानः सरसमहिमगानः स्वानुभूत्येकमानः॥

कलिका—

अपिच पुरातननूतनशिवगणपादोदकपरिलसदभिषेकः ।

* * * *

करतलयुगलविहितपुरहरयजनमपहितकरणसततपरिमुदितसकलजन ।

End:

यः संगीतनिधिर्यमाहुरभवं येनार्चितं सूनृतं
यस्मै स्वस्ति यतस्तदीयमुदभूद्यद्वीरशैवव्रतम् ।
यस्यापाङ्गसहोदरी च करुणा यस्मिन्महत्त्वादिकं
स त्वं त्रीणि जगन्ति पाहि बसवामात्येशचूडामणे ॥
बसवराजगुणमणिखचितं जयतात्सुवर्णमेतत् ।
सोमसुकविना रचितं हृदयाभरणं सदा(ता)मुदाहरणम् ॥

Colophon:

उदाहरणगद्यं समाप्तम् ॥

No. 9565. वृषभाष्टकम्.
VṚṢABHĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 135*a* of the MS. described under No. 781.

Complete.

Eight stanzas in praise of Vṛṣabha or Śiva's bull: by Pālkurikī Sōmakavi.

This work is said to have been copied by Mājēṭi Sarvēśaliṅga.

Beginning:

पक्षीन्द्रवाहनतपोबलसाधनीय सर्वेश्वरोल्लसितवाहनलाल्यमान ।
कापालिरूपसमुपेत पुनीतदृष्टे श्रीवज्रशृङ्ग वृषभाधिपते नमस्ते ॥

End:

प्रासावतारखलदुस्सहदोषशान्ते लोकैकपालनलसद्गुसवाभिधान ।
दृष्टश्रुतप्रकटितेश्वरभक्तिसार श्रीवज्रशृङ्ग वृषभाधिपते नमस्ते ॥

पाल्कुरुकिसोमरचितं वृषभाष्टकं यः
स्तोत्रं शृणोति पठते हरिनिश्रितार्थम् ।
सोऽप्याशु याति वृषभाधिपतिप्रसादा-
ल्लभ्येन शुद्धपदभक्तिफलादभीष्टम् ॥

Colophon:

वृषभाष्टकं सम्पूर्णम् ॥

No. 9566. वृषभाष्टकम्.
VṚṢABHĀṢṬAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 57*b* of the MS. described under No. 2550.

Complete.

Same work as the above.

No. 9567. वृषभाष्टकम्.
VṚṢABHĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 6a of the MS. described under No. 9545.

Complete.

Same work as the above.

---

(12) PĀRVATI.

No. 9568. अम्बादशकम्.
AMBĀDAŚAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 9a of the MS. described under No. 5541, wherein this work has been mentioned as Ambāṣṭaka in the list of other works given therein.

Complete.

Ten stanzas in praise of the goddess Amba who is the same as Pārvatī.

Beginning :

शब्दब्रह्ममयी चराचरमयी ज्योतिर्मयी वाङ्मयी
नित्यानन्दमयी निरञ्जनमयी संविन्मयी चिन्मयी ।
तत्त्वातीतमयी परापरमयी मायामयी श्रीमयी
सर्वैश्वर्यमयी सदाशिवमयी मां पाहि मीनाम्बिके ॥ १ ॥

End:

अम्बा रौद्रिणि भद्रकालि भ्रमरी बगलामुखी वैष्णवी
ब्रह्माणी त्रिपुरान्तकी सुरसुता देवी विमानोज्ज्वला ।
चामुण्डाश्रितवीरपोषजननी दाक्षायणी वल्लभी
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ १० ॥

No. 9569. अम्बाष्टकम्.
AMBĀṢṬAKAM.

Page, 1. Lines, 4 on a page.

Begins on fol. 10*b* of the MS. described under No. 5559.

Incomplete.

Eight stanzas in praise of the goddess Ambā.

Beginning:

श्रीमद्रत्नविराजमानमकुटां सिन्दूरसीमन्तिनीं
शोणाभामलकुङ्कुमाङ्कनिटिलां शम्भुप्रियां पार्वतीम् ।
शुम्भाद्याखिलदैत्यवृन्दशमनीं शातोदरीं श्रीकरी-
मम्बामम्बुरुहासनां भगवतीं वन्दे सदा शांभवीम् ॥ १ ॥

End:

मन्दारद्रुममध्यसौधनिलयां माणिक्यहारोज्ज्वलां
मन्दस्मेरयुताननां मधुमतीमारक्तनेत्रोज्ज्वलाम् ।
माध्वीपानरतां सुमेरुनिलयां मन्दारहारोज्ज्वला-
मम्बामम्बुरुहासनां भगवतीं वन्दे सदा शांभवीम् ॥ २ ॥

No. 9570. अम्बाष्टकम्.
AMBĀṢṬAKAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 50*a* of the MS. described under No. 5686.

Breaks off in the third stanza.

Same work as the above.

No. 9571. अम्बास्तोत्रम्.
AMBĀSTŌTRAM.

Substance, palm-leaf. Size, 13⅞ × 1¼ inches. Pages, 10. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 7*b*. The other works herein are Laghustōtra 1*a*, Carcāstōtra 4*b*, Sakalajananīstava 12*a*, Mātṛkāpuṣpamālikā 18*a*, Dēvībhujaṅgastōtra 27*a*, Āmnāyastava 32*a*.

Complete.

Similar to the above.

Beginning:

यामामनन्ति मुनयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यगु(गि)रो गृणन्ति ।
तामर्धपल्लवितशङ्करचापमुद्रां
देवीमनन्यशरणः शरणं प्रपद्ये ॥

अम्ब स्तवेषु तव तावदकर्तृकाणि
कुण्ठीभवन्ति वचसामपि गुम्भनानि ।
डिम्भस्य मे स्तुतिरसावसमञ्जसापि
वात्सल्यनिम्नहृदयां भवतीं धु(धि)नोति ॥

End:

लावण्यं वनिताविलोकनहरं श्रीस्तुङ्गभोगप्रदा
प्रौढिर्व्याशु(ति)करा(रं)कवित्वमतुलं पाण्डित्यमत्यद्भुतम् ।
इत्येकैकमनेकजन्मसुकृतैः प्राप्यं तवैतत्पुनः
सत्यं देवि तव प्रसादकणिकालेशस्य लभ्यं फलम् ॥

Colophon:

इति श्रीअम्बास्तवः संपूर्णः ॥

No. 9572. अम्बास्तोत्रम्.
AMBĀSTŌTRAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 143*b* of the MS. described under No. 5609.

Complete.

Same work as the above.

No. 9573. अम्बास्तोत्रम्.
AMBĀSTŌTRAM.

Substance, palm-leaf. Size, 14⅝ × 1¼ inches. Pages, 6. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 21*b*. The other works herein are Śivapradakṣiṇavidhi 1*a*, Ṛṣipañcamīvrata 3*a*, Śaṅkaravijayavilāsa 5*a*, Laghustōtra 17*a*, Carcāstava 19*b*, Sakalajananīstava 24*a*.

Complete.

Same work as the above, but with a different end and colophon as given below. The author of the work is here said to be Kâli-dâsa :—

कुवलयदलनीलं बर्बरस्निग्धकेशं
पृथुतरकुचभारक्रान्तकान्तावलग्नम् ।
बहुभिरिह किमुक्तैस्त्वत्स्वरूपं परं नः
सकलभुवनमातः संततं संनिधत्ताम् ॥

Colophon :

इति श्रीकालिदासकृतौ अम्बास्तुतिः संपूर्णा ॥

No. **9574.** अम्बास्तोत्रम्.

AMBÂSTÔTRAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 223*b* of the MS. described under No. 119

Complete.

Same work as the above, but with a different end.

End :

मञ्जीरशोभिचरणावलिशोभिमध्यां
हाराभिराममुखमम्बु(नीर)रुहाभिरामाम् ।
मन्दस्मिताननमहीधरकन्यकाख्यां
ज्ञानप्रदां शिवसती हृदि चिन्तयामि ॥

Colophon :

अम्बास्तवः संपूर्णः ॥

No. **9575.** अम्बास्तोत्रम्.

AMBÂSTÔTRAM.

Pages, 10. Lines, 16 on a page.

Begins on fol. 236*b* of the MS. described under No. 1782.

Complete.

Same work as the above, but with a different end as given below:—

> कपर्दिहस्ताम्बुजकल्प्यमानपत्रावलीभासुरगण्डशोभा ।
> अस्माकमम्भोरुहलोचनश्रीरावर्द्ध(पद्ध)नं केवलमम्बिकैव ॥
> वने रणे शत्रुजलाग्निमध्ये मृत्युज्वरे राजभये निहन्ति ।
> दारिद्र्यविद्रावणमष्टसिद्धिरम्बास्तवानां वरतो नराणाम् ॥

Colophon:

> इत्यम्बास्तवं(वः) सम्पूर्णं(र्णः) ।

No. 9576. कामाक्षीपञ्चशती.
KĀMĀKṢĪPAÑCAŚATĪ.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 98. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains Pādaśataka, Kaṭākṣaśataka, Āryāśataka complete, and Smitaśataka incomplete.

A work containing five hundred stanzas in praise of the goddess Kāmākṣī as worshipped in the temple at Kāñcīpuram.: by Mūkakavi.

Beginning:

> महिम्नः पन्थानं मदनपरिपन्थिप्रणयिनि
> प्रभुर्निर्णेतुं ते भवति यतमानोऽपि कतमः ।
> तथापि श्रीकाञ्चीविहृतिरसिके कोऽपि मनसो
> विपाकस्त्वत्पादस्तुतिविधिषु जल्पाकयति माम् ॥

End:

> जानीमो जगदीश्वरि प्रणमतां त्वन्मन्दहासप्रभां
> श्रीकामाक्षि कुमुद्वतीमभिनवामेषा यतः सर्वदा ।
> आस्य(स्ये)न्दोरवलोकने पशुपतेरभ्येति संफुल्लतां
> वन्द्रालुस्तदभाव एव तनुते तद्वैपरीत्यक्रमम् ॥ ६० ॥

No. 9577. कामाक्षीपञ्चशती.
KĀMĀKṢĪPAÑAŚATĪ.

Substance, palm-leaf. Size, 12¾ × 1¼ inches. Pages, 24. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Tripurasundarimantra 13*a*, Tripurasundarimālāmantra 13*b*, Śivapūjāvidhi 20*a*, Kālahastīśvarāṣṭaka 37*a*, Paradēvatāprasannastōtra 39*a*.

Contains Kaṭākṣaśataka only complete.

Same work as the above.

This manuscript work is said to have been copied by Majeṭi Sarvēśaliṅga from the manuscript belonging to Cērilōya Vaidyaliṅga, the copying having been completed on Saturday, the 11th day of the dark fortnight of the month of Jyēṣṭha, in the year Virōdhi.

No. 9578. कामाक्षीपञ्चशती.
KĀMĀKṢĪPAÑCAŚATĪ.

Substance, palm-leaf. Size, 7½ × 1⅜ inches. Pages, 12. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Saundaryalaharī with commentary 7*a*.

Contains Pādaśataka only incomplete.

Same work as the above.

No. 9579. कामाक्षीपञ्चशती.
KĀMĀKṢĪPAÑCAŚATĪ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 14. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 171*a*. The other work herein is Kumārasambhava with commentary 1*a*.

Āryāśataka only complete.

Same work as the above.

No. 9580. कामाक्षीस्तुतिः.
KĀMĀKṢĪSTUTIḤ.

Pages, 11. Lines, 4 on a page.

Begins on fol. 153*a* of the MS. described under No. 5600.

Complete.

Similar to the above. By Rāmacandrāryasūri of Kauṇḍinya-gōtra.

Beginning:

वन्दे कामाक्ष्यहं त्वां वरतनुलतिकां विश्वरक्षैकदीक्षां
विष्वग्विश्वंभरायामुपगतवसतिं विश्रुतामिष्टदात्रीम् ।
वामोरूमाश्रितार्तिप्रशमननिपुणां वीर्यशौर्याद्युपेतां
वन्दारुस्वर्द्रुमिन्द्राद्युपगतविटपां विश्वलोकालवालाम् ॥ । १ ।

End:

कामाक्षीस्तुतिमन्वहं भुवि नराः शुद्धाश्च ये भक्तितः
श्रृण्वन्त्यत्र पठन्ति वा स्थिरधियः पुण्यामिमामर्थिनः ।
दीर्घायुर्धनधान्यसंपदममी विन्दन्ति वाणीं यशः
सौभाग्यं सुतपौत्रजातमधिकख्यातिं मुदं सर्वदा ॥२१॥
कौण्डिन्यान्वयसंभूतरामचन्द्रार्यसूरिणा ।
निर्मिता भाति कामाक्षीस्तुतिरेषा सतां मता ॥

No. 9581. कामाक्षीस्तोत्रम्.
KĀMĀKṢĪSTŌTRAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 208*a* of the MS. described under No. 119, wherein this work is stated to begin on fol. 208*a* in the list of other works given therein.

Complete in twenty-two stanzas.

Similar to the above.

Beginning:

कल्पानोकहपुष्पजालविलसन्नीलालकां मातृकां
कान्तां कंजदलेक्षणां कलिमलप्रध्वंसिनीं कालिकाम् ।

काञ्चीनूपुरहारहीरसुभगां काञ्चीपुरीनायकीं
कामाक्षीं करिकुम्भसन्निभकुचां वन्दे महेशप्रियाम् ॥१॥

End:

गन्धर्वैः श्रुतिभिः सदासुरसुरैर्ब्रह्मादिदिक्पालकैः
वेदैः शास्त्रपुराणविप्रपठितं स्तोत्रं सदाध्यायिनी(नाम्) ।
सर्वेषां सकलार्थमी(दे)ष्टफलदा स्तोतुं सदा पार्वती
कामाक्षी करुणाकटाक्षविभवीम(वैर)ङ्गीकरी(कृतं) पाहि माम् ॥ २२ ॥

No. 9582. गिरिजादशकम्.
GIRIJĀDAŚAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 208*a* of the MS. described under No. 119, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Ten stanzas in praise of the goddess Pārvatī who is, according to the Purāṇas, the daughter of the mountain Himalayas.

Beginning:

मन्दारकल्पहरिचन्दनपारिजातमध्ये शशाङ्कमणिमण्डपवेदिसंस्थे ।
अर्धेन्दुमौलिसुललाटषडर्धनेत्रे भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

End:

भक्त्या स्तुवन्ति गिरिजादशकं प्रभाते
पुत्रार्थिनो (हि) धनधान्यसमृद्धिकामाः ।
प्रीता महेशवनिता हिमशैलकन्या
ये(ते)षां ददाति सुतला(धा)न्य(धने)प्सितानि ॥

No. 9583. गिरिजादशकम्.
GIRIJĀDAŚAKAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under No. 5953, wherein this work has been mentioned as Annapūrṇēśvarīstōtra in the list of other works given therein.

Complete.

Same work as the above, with the addition of one stanza in the beginning as given below :—

उद्यद्भानुनिभां दुकूलवसनां क्षीरोदमध्यास्थितां
मूले कल्पतरोः स्फुरन्मणिमये सिंहासने संस्थिताम् ।
बिभ्राणां भुजयोः सुवर्णचषकं बीजं च शाल्युद्भवं
भक्ताभीष्टवराभयाञ्जलिपुटां ध्यायेऽन्नपूर्णेश्वरीम् ॥

No. 9584. गौरीदशकम्.
GAURĪDAŚAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 211*b* of the MS. described under No. 119, wherein this work has been mentioned as Gauryaṣṭaka in the list of other works given therein.

Complete.

Similar to the above.

Beginning :

लीलालब्धस्थापितलुप्ताखिललोकां लोकातीतैर्योगिभिरन्तःस्थिरमृग्याम् ।
बालादित्यश्रेणिसमानद्युतिपुञ्जां गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥
आशापाशक्लेशविनाशं विदधानां पादाम्भोजध्यानपराणां पुरुषाणाम् ।
ईशामीशार्धाङ्गशरीरामभिरामां गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥

End :

प्रातःकाले भावविशुद्धेः प्रणिधानाद्भक्त्या नित्यं जल्पति गौरीदशकं यः ।
वाचां सिद्धिं संपदमुच्चैः शिवभक्तिं तस्यावश्यं पर्वतपुत्री विदधाति ॥

No. 9585. गौरीदशकम्.
GAURĪDAŚAKAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 10*b* of the MS. described under No. 8609, wherein this work has been stated to begin on fol. 12*b* in the list of other works given therein.

Complete.

Same work as the above.

No. 9586. गौरीदशकम्.
GAURĪDAŚAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 1a of the MS. described under No. 6548.

Wants beginning. Almost complete.

Same work as the above.

No. 9587. गौरीदशकम्.
GAURĪDAŚAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 8a of the MS. described under No. 9022

Complete.

Same work as the above, with colophon.

Colophon:

इति श्रीमच्छङ्करभगवत्पूज्यपादकृतं गौरीदशकं संपूर्णम् ।

No. 9588. चर्चास्तोत्रम्.
CARCĀSTŌTRAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 4b of the MS. described under No. 9571.

Complete.

This work is in praise of the goddess Dēvi. It is called Carcāstōtra because it is intended to be repeated several times; and the magical powers acquired by such repetition are described in the concluding stanzas.

Beginning:

सौन्दर्यविभ्रमभुवो भुवनाधिपत्यसङ्कल्पकल्पतरवस्त्रिपुरे जयन्ति ।
एते कवित्वकुमुदप्रकरावबोधपूर्णेन्दवस्त्वयि जगज्जननि प्रणामाः ॥

देवीस्तुतिव्यतिकरे कृतबुद्धयस्ते वाचस्पतिप्रभृतयोऽपि जडीभवन्ति ।
तस्मान्निसर्गजडिमा कतमोऽहमत्र स्तोत्रं तव त्रिपुरतापनपत्नि कर्तुम् ॥

End:

यस्स्तोत्रमेतदनुवासरमम्बिकायाः
श्रेयस्करं पठति वा यदि वा शृणोति ।
तस्यैहिकं फलति राजभिरीड्यतेऽसौ
जायेत न (स) प्रियतमो मदिरेक्षणानाम् ॥

खड्गं पादुकमञ्जनं च घुटिकां सारस्वतं संपदं
मृत्योर्वञ्चनमुग्रकालहरणं देहान्वितेः कारणम् ।
भ्रूभङ्गादश(त्वग)तुङ्गशृङ्गपतनं वश्यं जगद्योषितां
चर्चावुध्य(जप्य)मिदं करोतु सततं त्वत्पूजकस्येप्सितम् ॥

Colophon:

इति चर्चास्तोत्रं संपूर्णम् ॥

No. 9589. चर्चास्तोत्रम्.
CARCÂSTÔTRAM.

Pages, 7. Lines, 14 on a page.

Begins on fol. 233*a* of the MS. described under No. 1782
Complete.
Same work as the above.

No. 9590. चर्चास्तोत्रम्.
CARCÂSTÔTRAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 221*b* of the MS. described under No. 119
Complete.
Same work as the above.

No 9591. चर्चास्तोत्रम्.

CARCĀSTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 135*b* of the MS. described under No. 5600.

Complete.

Same work as the above.

No. 9592. चर्चास्तोत्रम्.

CARCĀSTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 19*b* of the MS. described under No. 9573.

Complete.

Same as the above, with a different colophon as given below :—

इति श्रीकालिदासकृता चर्चास्तुतिः संपूर्णा ॥

No. 9593. दाक्षायणीस्तोत्रम्.

DĀKṢAYAṆĪSTŌTRAM.

Pages, 5. Lines, 8 on a page.

Begins on fol. 206*a* of the MS. described under No. 119.

Complete.

A eulogy on Pārvatī conceived as the daughter of Dakṣa.

Beginning :

गम्भीरावर्तनाभिर्मृगमदतिलका वामबिम्बाधरोष्ठी
श्रीकान्ता काञ्चिदाम्ना परिवृतजघना कोकिलालापवाणी ।
कौमारी कम्बुकण्ठी प्रहसितवदना धूर्जटिप्राणकान्ता
रम्भोरूः सिंहमध्या हिमगिरितनया शाम्भवी नः पुनातु ॥

End:

माणिक्यनूपुरविभूषितपादपद्मां हस्तारविन्दकरुणारसपूर्णदर्वीम् ।
सन्ध्यारुणांशुकधरां नवचन्द्रजूटां मन्दस्मिते गिरिसुते भवतीं भजामि ॥

No. 9594. देवीचूर्णिका.
DĒVĪCŪRṆIKĀ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 27*a* of the MS. described under No. 5559.

Complete.

A peculiar kind of prose composition in praise of the goddess Dēvī.

Beginning:

श्रीमत्प्रालेयशैलराजकुमारि, कौमारि, क्षीरपारावारकन्यामणिमनोहर-गम्भीरदक्षिणावर्तनाभिविवरकंजातसंजातपुरन्दरवृन्दारकसंदोहमस्तकन्यस्त-विपुलतटघटितचित्रामूल्यनवरत्नकिरणदीपिकासमुच्चयनीराजिततरुणप्रवालल-तानितान्तारुणप्रभापटल[न]विधूतमृदुलकोमलपदारविन्दयुगले

End:

निजभक्तजनानुग्रहकारणश्रीदेशिकस्वरूपिणि श्रीमहात्रिपुरसुन्दरि पाहि मां पाहि मां पाहि मां नमस्ते नमस्ते नमस्ते नमः ॥

No. 9595. देवीभुजङ्गः.
DĒVĪBHUJAṄGAḤ.

Pages, 10. Lines, 4 on a page.

Begins on fol. 27*a* of the MS. described under No. 9571.

Complete.

This is also in praise of the goddess Dēvī who is the same as Pārvatī and is written in a peculiar metre called Bhujaṅgaprayāta.

Beginning :

विरिञ्चादिभिः पञ्चभिर्लोकनाथैः समूढे महानन्दपीठे निषण्णम् ।
धनुर्बाणचापाङ्कुशप्रोतहस्तं महत्त्रैपुरं शङ्कराद्वैतमव्यात् ॥

यदन्नादिभिः पञ्चभिः कोशजातैः शिरःपक्षपुच्छात्मकैरन्तरन्तः ।
निगूढे महानन्दपीठे निषण्णं पुरारेरता(था)न्तःपुरं नौमि नित्यम् ॥

End :

भुजङ्गप्रयाताख्यमेतत्पठेद्यो भुजङ्गप्रयस्तं महाकालवेगम् ।
विजित्य श्रिये लीलया भक्तिभाजां वितर्तुं समीष्टे नृणां भोगमोक्षान् ॥

Colophon :

इति शङ्कराचार्यविरचितः देवीभुजङ्गः समाप्तः ॥

No. 9596. देवीभुजङ्गः.
DEVĪBHUJAṄGAḤ.

Pages, 5. Lines, 4 on a page.

Begins on fol. 150*a* of the MS. described under No. 5600, wherein this work has been mentioned as Pralāpastuti in the list of other works given therein.

Wants Phalaśruti stanza at the end.

Same work as the above, but with a different colophon as given below :—

इति प्रलापस्तुतिः समाप्ता ॥

No. 9597. देवीस्तोत्रम्.
DEVĪSTŌTRAM.

Substance, palm-leaf. Size, 8 × 1 inches. Pages, 29. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Saundaryakanakāmbikāstōtra 16*a*.

Complete in one hundred and three stanzas.

Similar to the above.

Beginning:

विज्ञापनार्हे (इह ते)ऽवसरानवाप्य मन्दोद्यमे मयि दवीयसि विश्वमातुः ।
अव्याजभूतकरुणापवनापविद्धान्यन्तः स्मराम्यहमपाङ्गतरङ्गितानि ॥
आवेद्यतामविदितं किमथाप्यनुक्तं वक्तव्यमान्तररजोपशमाय नालम् ।
इत्युच्यते किमपि तच्छ्रवणे निधातुं मातः प्रसीद मलयध्वजपाण्ड्यकन्ये ॥

End:

कालानवाप्य विषुवायनसंक्रमादी-
नस्तं गते हिमकरे च दिवाकरे च ।
अम्ब स्मरेयमयि ते चरणं तुरीय-
मानन्दलक्षणमपास्तसमस्तभेदम् ॥ १०३ ॥

No. 9598. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 201*a* of the MS. described under No. 119.

Complete.

Similar to the above. From another manuscript of this work described under No. 9602, it is made out that the author is the well-known Śaṅkarācārya, the disciple of Gōvinda.

Beginning:

कुन्दसुन्दरमन्दहासविराजिताधरपल्लवा-
मिन्दुबिम्बनिभाननामरविन्दचारुविलोचनाम् ।
चन्दनागरुपङ्करूषिततुङ्गपीनपयोधरां
चन्द्रशेखरवल्लभां प्रणमामि शैलसुतामि(सु)माम् ॥

End:

नित्यमेव नियमेन जप्यतां भक्तिमुक्तिफलदामभीष्टदाम् ।
शंकरेण रचितां सदा जपेन्नामरत्ननवरत्नमालिकाम् ॥

No. 9599. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 46*b* of the MS. described under No. 369.

Complete.

Same work as the above.

No. 9600. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 3. Lines, 9 on a page.

Begins on fol. 19*a* of the MS. described under No. 3178.

Complete.

Same work as the above, but without the Phalaśruti stanza.

No. 9601. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 5. Lines, 8 on a page.

Begins on fol. 10*b* of the MS. described under No. 6548.

Complete.

Same work as the above.

No. 9602. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 55*a* of the MS. described under No. 5858.

Complete.

Same work as the above, but with a colophon as given below :—

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दपादपूज्य(शिष्य)-श्रीमच्छङ्कराचार्यविरचितं नवरत्नमालिकास्तोत्रं संपूर्णम् ॥

No. 9603. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 171a of the MS. described under No. 124.

Complete.

Similar to the above. In the last stanza it is stated that whosoever always reads or writes this work becomes a learned person.

Beginning:

ओंकारपञ्जरशुकीमुपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीमार्यामन्तर्विभावये गौरीम् ॥
दयमानदीर्घनयनां देशिकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां संगीतमातृकां वन्दे ॥

End:

नवरत्नमा(ल्य)मेतद्रचितं मातङ्गकन्यकाभरणम् ।
यः पठति लिखति सततं स भवेद्वागीश्वरी(रः) साक्षात् ॥

No. 9604. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 21a of the MS. described under No. 5559.

Complete.

Same work as the above.

No. 9605. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 276a of the MS. described under Nos. 537 and 7247.

Complete.

Same work as the above.

No. 9606. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 5660.

Complete.

Same work as the above, but with the addition of one stanza in the beginning.

Similar to the above.

Beginning:

कुन्दमुकुलाग्रदन्तां कुङ्कुमपङ्केन लिप्तकुचभाराम् ।
आनीलनीलदेहामम्बामखिलाण्डनायिकां वन्दे ॥

No. 9607. कामाक्षीपञ्चशती.
KĀMĀKṢĪPAÑCAŚATĪ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 34. Lines, 4 on a page. Character, Grantha. Condition, injured. Appearance, old.

Kaṭākṣaśataka only complete.

Same work as the one described under No. 9576; but with a different end as given below :—

End:

यावेन लोचनरुचा तव कामकोटिपातेन पातकपयोधिभयातुराणाम् ।
पूतेन तेन नवकाञ्चनकुण्डलांशुपातेन शीतलय भूधरकन्यके माम् ॥

Colophon:

इति श्रीकटाक्षशतकं समाप्तम् ॥

No. 9608. पार्वतीस्तोत्रम्.
PĀRVATĪSTŌTRAM.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 24. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, not old.

Begins on fol. 1*a* The other work herein is Śivastōtra 13*a*.

Complete in a hundred and one stanzas of Śārdūlavikrīḍita metre.

A hymn of praise relating to the goddess Pārvatī by Vīrarāghava who describes himself in the last stanza to be an inhabitant of the village of Sahaji-Mahārājapura. Probably he is identical with the author of Vallīpariṇaya.

Beginning:

देवीं शैलसुतां सुधाकरकलामौलिं त्रिणेत्रीं शिवां
श्यामां पाणिसरोजयोः शुकवरं सद्बल्कीं बिभ्रतीम् ।
शम्भोरङ्कमुपाश्रितां मरतकश्यामां श्रिताभीष्टदां
माणिक्यादिसुरत्नभूषिततनुं कौसुम्भचेलां भजे ॥ १ ॥
माहात्म्यं तव लोकनायकि शिवे वक्तुं फणीशोऽप्यसौ
वाणीताण्डवमण्डपायितमुखाम्भोजः सरोजासनः ।
नालं चेत्यविगत्य दुर्गतिभयच्छेदक्रियालोभतः
प्रायेण स्पृहयाम्यहं सुनुतये नानानमद्भूतये ॥ २ ॥

End:

किंचित्किंचिदुदश्रयन् प्रसभतः शब्दान् पुनः पद्यान्
हे मातस्तव तान् सलज्जममितश्रद्धं समर्प्येश्वरि ।
संतुष्टोऽस्मि शिवे त्वयात्र किमु वा विज्ञाप्यतेऽतः परं
किं वास्तीत्ययमर्पयिष्यति नतिः साष्टाङ्गमस्याः स्तुतेः ॥ १०१ ॥
सहजिमहाराजपुरग्रामनिवासी विवेकिमूर्धन्यः ।
श्रीवीरराघवाख्यः पार्वत्याः स्तोत्रमेतदतनिष्ट ॥

No. 9609. पार्वतीस्तोत्रम्.

PĀRVATĪSTŌTRAM

Pages, 47. Lines, 5 on a page.

Begins on fol. 128a of the MS. described under No. 8633.

Complete.

Similar to the above.

Beginning:

मामाङ्क्षी(क्षी)र्विभ्रमं भ्रूरथर विधुरता केयमास्यास्य रागं
पाणे भाण्येव नायं कलयसि कलहश्रद्धया किं त्रिशूलम् ।
इत्युद्यत्कोपकेतून् प्रकृतिमवयवान् भापयन्त्यैव देव्या
न्यस्तो वो मूर्ध्नि मुष्यान्मरुदसुहृदसून् संहरन्नङ्घ्रिरंहः ॥

End:

चक्रे चक्रायुधस्य क्वणति निपतिते रोमणि भ्रावणीव
स्थाणोर्बाणस्य वेगे प्रतिहत उरुणा चर्मणा वर्मणेव ।
यस्येति क्रोधगर्भं हसितहरिहरा तस्य गीर्वाणशत्रोः
पायात्पादेन मृत्युं महिषतनुभृतः कुर्वती पार्वती वः ॥

No. 9610. पार्वतीस्तोत्रम्.

PĀRVATĪSTŌTRAM.

Substance, palm-leaf. Size, 18¾ × 1½ inches. Pages, 2. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance new.

Begins on fol. 1a. The other works herein are Viṣṇustōtra 2a, Śaṅkarācāryavijaya 4a, Hayagrīvastōtra 67a, Bhagavaddhyāna-sōpāna 68b, Abhītistava 69a, Nyāsatilaka 71a, Raghuvīragadya 73a, Śrīstuti 75b, Bhūstuti 77b, Gōdāstuti 79b, Stōtraratna 80b, Gōpālaviṁśati 86a.

Complete.

Similar to the above.

Beginning:

जय जननि जनितभव्ये जय देवि परिरब्धशंभुतव्ये ।
मखमुखगृहीतहव्ये जय सुकविसूक्तिशतनित्यसेव्ये ॥
जय जलजसहजवदने शर्वाणि संजीवितार्तमदने ।
परिहसितकुन्दरदने योगीन्द्रहृदयाम्बुजात्मसदने ॥

End:

अभितोऽपि भव्यवेदीं विचरणनखकौमुदीकलितकान्त्या ।
पिष्टातधूलिकेलिं विरचय्य जेजीयसे भुवनपालिम् ॥

No 9611. भवानीपुष्पाञ्जलिस्तोत्रम्.
BHAVĀNĪPUṢPĀÑJALISTŌTRAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 45*a* of the MS described under No. 2040.

Incomplete.

Same work as the one described under R. No 372(*j*) of the Triennial Catalogue of MSS. Vol. I, Part 1–B.

No. 9612. भवानीभुजङ्गप्रयातस्तोत्रम्.
BHAVĀNĪBHUJAṄGAPRAYĀTASTŌTRAM.

Pages, 2 Lines, 6 on a page.

Begins on fol. 82*a* of the MS. described under No. 435.

Complete

Similar to the above. The goddess Bhavānī is the same as Pārvatī This Stōtra is written in the Bhujaṅgaprayāta metre and this accounts for the name of the work.

Beginning:

षडाधारपङ्केरुहान्तर्विराजत्सुषुम्नान्तरालेऽतितेजोल्ल(ल)सन्तीम् ।
सुधामण्डली द्रावयन्ती पिबन्ती सुधामूर्तिमीडे महानन्दरूपाम् ॥

End:

इति श्रीभवानीभुजङ्गप्रयातस्तुति यः पठेद्भक्तियुक्तः स तस्मै ।
स्वकीयं पदं शाश्वतं वेदसारं श्रियं च स्वसिद्धिं च देवी ददामि(ति) ॥

No. 9613. भवानीमानसस्तोत्रम्.
BHAVĀNĪMĀNASASTŌTRAM.

Pages, 34. Lines, 7 on a page.

Begins on fol. 16*b* of the MS. described under No. 367.

Complete.

Similar to the above. This Stōtra is intended to be repeated mentally. It is attributed in the colophon to Śaṅkarācārya.

Beginning:

उषसि मागधमङ्गलगायनैरुषसि झटिति जागृहि जागृहि ।
अतिकृपार्द्रकटाक्षनिरीक्षणैर्जगदिदं जगदम्ब सुखीकुरु ॥

End:

पुत्रोऽहं भक्तिसंयुक्तो यः पूजनमिदं तव ।
वाग्वादिन्याः प्रसादेन वत्सरात्स कविर्भवेत् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं भवानी-मानसस्तोत्रं संपूर्णम् ॥

No. 9614. भ्रमराम्बिकाष्टकम्.
BHRAMARĀMBIKĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 202*a* of the MS. described under No. 119.

Complete.

Eight stanzas in praise of the goddess Bhramarāmbikā, as worshipped in the temple at Śrīśaila in the Kurnool district.

Beginning:

श्रीकण्ठार्पितपत्रगण्डयुगलां सिंहासनाध्यासिनीं
लोकानुग्रहकारिणीं गुणवतीं लोलेक्षणां शांकरीम् ।
पाकारिप्रमुखामरार्चितपदां मत्तेभकुम्भस्तनीं
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ १ ॥

End:

ब्रह्मर्षीश्वरवन्द्यपादकमलां पङ्केरुहाक्षां स्तुतां
प्रालेयाचलवंशपावनकरीं शृङ्गारवारांनिधिम् ।
तत्त्वातीतमहाप्रभंविजनि(भावजननीं) दाक्षायणीं भैरवीं
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ८ ॥

भ्रमराम्बां(म्ब) महादेवीम(व्या अ)ष्टकं सर्वसेवित(सौख्यद)म् ।
स्मर्तॄणां तु नराणां च स्स(स)र्वमेतद्ददाम्यहम् ॥

No. 9615. भ्रमराम्बिकाष्टकम्.

BHRAMARĀMBIKĀṢṬAKAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 202*b* of the MS. described under No. 119, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above.

Beginning:

श्रीकान्तस्तुतसद्गुणान्वितपदां सिद्धर्षिसंसेवितां
बालेन्दुद्युतिपादपल्लवनखां ब्रह्माण्डसंचारिणीम् ।
चारुश्रीकलशातपत्रकमहासौभाग्यरेखाङ्कितां
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥ १ ॥

End:

श्रीशैलभ्रमराम्बिकाष्टकमिदं श्रेयस्करं शाश्वत-
मैन्द्रश्रीकरमप्रमेयमतुलं हर्षप्रदं बुद्धिदम् ।
प्राभाते नियम(त): पठेद्यदि पुमान्भक्त्यान्तरात्मा शुचिः
शौक्लीं कान्तिमवाप्नुयात्रिजगतां सर्वेश्वरत्वं जयम् ॥

No. 9616. मातृकापुष्पमालिकास्तोत्रम्.

MĀTṚKĀPUṢPAMĀLIKĀSTŌTRAM.

Pages, 18. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 9571.

Complete.

The stanzas herein begin with each of the successive letters of the alphabet and are in praise of the goddess Pārvatī. They are conceived to form a garland offered at the feet of Pārvatī.

Beginning:

अप्रत्यक्षकथामकृत्रिमगिरामर्कप्रकाशक्रमा-
मग्नाचित्तगुहामतर्क्यविभवामत्याज्यनिर्यत्कृपाम् ।
अक्षाणामविदेवतामविदितामभ्यासनामद्ब(शगामक्ष)गा-
मक्षीणागमसंविदद्वयकथामन्वेमि दक्षात्मजाम् ॥ १ ॥

End:

क्षरः(न्वक्ष) ध्यक्षपदैकलक्षणविधिक्षोपक्रमाणेक्षणे
क्षिपादक्षिचरेक्षुभांक्षलवतां क्षिप्रज्ञसंरक्षणी ।
ध्यक्षात्क्षयोगिपक्षुदक्षदमनि क्षुसा(क्षा)न्तदिक्षु(रिक्ष)त्स्ये
क्षन्तव्यं क्षितिभृत्सुते नुतिवचः क्षुद्रं ममेदं त्वया ॥ ५३ ॥
इति गिरिवरपुत्रीपादराजीवभूषा
भुवनममलयन्ती सूक्तिसौरभ्यसारैः ।
शिवरसमकरन्दस्यन्दिनी बद्धमाला
मदयतु कविभृङ्गान् मातृकापुष्पमाला ॥ ५४ ॥
पञ्चस्तवेषु श्लोकाः एकान्मस्तव दशः ? ॥

No. 9617. मातृकापुष्पमालिकास्तोत्रम्.
MĀTṚKĀPUṢPAMĀLIKĀSTŌTRAM.

Pages, 16. Lines, 8 on a page.

Begins on fol. 231*b* of the MS. described under No. 119.

Complete.

Same work as the above, with colophon.

Colophon:

मातृकापुष्पमालास्तवः संपूर्णः ॥

No. 9618. मातृकापुष्पमालिकास्तोत्रम्.

MĀTṚKĀPUṢPAMĀLIKĀSTŌTRAM.

Pages, 13. Lines, 4 on a page.

Begins on fol. 137*b* of the MS. described under No. 5600.

Complete.

Same work as the above.

No. 9619. मीनाक्षीनवरत्नमालिकास्तोत्रम्.

MĪNĀKṢĪNAVARATNAMĀLIKĀSTŌTRAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 16*a* of the MS. described under No. 2037, wherein this work has been mentioned as Mīnākṣīstuti 17*a* in the list of other works given therein.

In praise of the goddess Mīnākṣī as worshipped in the famous temple at Madura.

Contains the last two stanzas with incomplete Phalaśruti as given below.

Beginning and **End**:

आकर्णान्तसुदीर्घया सुदयया दृशा चर(ल)क्षांशु(भ)या
तस्मात्त्वं शफरेक्षणा न विबुधैर्लोकत्रये गीयसे ।
मामीक्षस्व विलोकनेन भुवनान्यापाल्य त्वं शिवे
मीना . . . . ॥ ८ ॥
मातः पालय पालयेति वचनं यो वक्ति तस्मिन् क्षणं
साम्राज्यं तमुपितत(दुपासक)स्य तनुतामीशानमध्ये स्थिता(ति)म् ।
एतादृक्करुणानिधिं सुखकरीमव्याजरक्षाकरी
मीना . . . . ॥ ९ ॥
ये पठन्ति नवरत्नमालिकां भक्तिमुक्तिसकलार्थदायिनीम् ।

No. 9620. मीनाक्ष्यष्टकम्.
MĪNĀKṢYAṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 3*b* of the MS. described under No. 9022.

Complete.

A prayer in eight stanzas for the grace of the goddess Mīnākṣi.

Beginning:

मधुरापुरनायिके नमस्ते मधुरालापशुकाभिरामहस्ते ।
मलयध्वजपाण्ड्यराजकन्ये मयि मीनाक्षि कृपां निधेहि धन्ये ॥
कचनिर्जितकालमेघकान्ते कमलासेवितपादपङ्कजान्ते ।
मधुरापुरवल्लभेष्टकान्ते मयि मीनाक्षि कृपां निधेहि दान्ते ॥

End:

पठतामनिशं प्रभातकाले मणिमालाष्टकमष्टभूतिदायि ।
घटिकाशतचातुरीं प्रपद्यात् करुणापूर्णकटाक्षसंनिवेशात् ॥

No. 9621. मूकाम्बिकास्तोत्रम्.
MŪKĀMBIKĀSTŌTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 204*a* of the MS. described under No. 119.

Complete.

In praise of the goddess Pārvatī, who is worshipped under the name, Mūkāmbikā, in a place called Kollūrādri.

Beginning:

मूलाम्भोरुहमध्यकोणविलसद्बन्धूकरागोज्ज्वलां
ज्वालाजालजितेन्दुकान्तिलहरीमानन्दसंदायिनीम् ।
लीलाललितनीलकुन्तलभरां नीलोत्तरीयांशुकां
कोल्लूराद्रिनिवासिनीं भगवतीं ध्यायामि मूकाम्बिकाम् ॥

End:

कुब्जाद्रौ रत्नपीठे(हि)सुरमुनिगणैरप्सरोभिष्ट(श्च)सेव्यां
मन्दारादिसमस्तदेवतरुभि(भिः) संशोभमानां पुमान् ।

सावर्णाम्बुजधारिणी त्रिणयनीं ये कोटिकामेश्वरीं
मूकाम्बां सकलेष्टासिद्धिफलदां वन्दे परं देवताम् ॥

No. 9622. मूकाम्बिकास्तोत्रम्.
MŪKĀMBIKĀSTŌTRAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 5953.

Complete.

Same work as the above but with a different end as given below:—

सौवर्णाम्बुजमध्यगां त्रिण॰नां सौदामिनीसंनिभां
शङ्खं चक्रवराभयानि दधतीमिन्दोः कलां बिभ्रतीम् ।
ग्रैवेयाङ्गदहारकुण्डलधरामाखण्डलाद्यैः स्तुतां
ध्यायेद्विन्ध्यनिवासिनीं भगवतीं ध्यायामि मूकाम्बिकाम् ॥

No. 9623. मूकाम्बिकास्तोत्रम्.
MŪKĀMBIKĀSTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 205*a* of the MS. described under No. 119, wherein this copy of the work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above. Herein the place of worship of the Goddess is said to be Kollāṅka on the banks of the river, Sauvarṇa, near the hill, Kōḍiśa, in the Sahyadri mountains.

Beginning:

श्रीमत्सह्याद्रिमध्ये स्थितकोडिशगिरिप्रान्तदेशेऽतिरम्य-
स्थाने कोल्लाङ्कनाम्ना प्रकटमुपगते लिङ्गरूपादिशक्तिम् ।
तीरे सौवर्णनद्याः सकलजनहितायाश्रिता मूकहन्त्री
पायाद्वीरेशविघ्नेश्वरगुहसहिता शंभुयुक्ताम्बिका वः ॥

End:

श्यामां तामरसोदरीं प्रियवधूं विश्वप्रपञ्चात्मिकां
गङ्गानीतकबन्धसेचनवतीं मन्दारमालाधराम् ।

कस्तूरीहरिचन्दनाङ्किततनुं चित्राम्बरालंकृतां
कल्याणीं कांडिशाद्रिमूर्ध्नि जनितां ध्यायामि मूकाम्बिकाम् ॥

No. 9624 लघुस्तोत्रम्.

LAGHUSTŌTRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 9571.

Complete.

A hymn of praise addressed to the goddess Dēvī, the repetition of which is held o enable a person to accomplish his desires quickly. In the colophon given under another copy of the same work, described below, the author is said to be Kālidāsa.

Beginning:

इ(ऐ)न्द्र(स्या)स्य[वा]शरास(न)स्य दधती मध्येललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरश्चातन्वती सर्वतः ।
एषां सौ त्रिपुरा हृदि द्युतिरिवोष्णांशोः सदाहा स्थिता
छिन्द्यान्नः सहसा पदैस्त्रिभिरहो धो(ज्यो)तिर्मयी वाङ्मयी ॥

End:

आनन्दोद्भवकम्पघूर्णमनघं रौद्राट्टहासं मदो-
द्वेगव्याकरणावगाहनगरक्षोभादिसेव्यष्टकम् ।
वश्याकर्षपुनःप्रवेशकवितातत्त्वोक्तिमुक्तिप्रदं
लब्ध्वे जप्यामिदं करोति विपुलान्भोगान्महीमण्डले ॥

Colophon:

इति लघुस्तोत्रं संपूर्णम् ॥

No. 9625. लघुस्तोत्रम्.

LAGHUSTŌTRAM.

Pages, 7. Lines, 8 on a page.

Begins on fol. 218*a* of the MS. described under No. 119.

Complete.

Same work as the above.

No. 9626. लघुस्तोत्रम्.

LAGHUSTŌTRAM.

Pages, 8. Lines, 4 on a page.

Begins on fol. 133*a* of the MS. described under No. 5600.

Complete.

Same work as the above.

No. 9627. लघुस्तोत्रम्.

LAGHUSTŌTRAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 9573

Complete.

Same work as the above, with a different colophon as given below:—

इति श्रीमत्कविराजराजिमुकुटरत्नराजिनीराजितचरणारुणराजीवस्य राजेश्वरीकटाक्षलब्धनिखिलानवद्यविद्यस्य तत्रभगवतः श्रीकालिदासस्य कृतिषु श्रीदेवीलघुस्तवः संपूर्णः ॥

No. 9628. शारदाम्बाष्टकम्.

ŚĀRADĀMBĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 5559.

Almost complete.

Eight stanzas in praise of Śāradāmbā, the repetition of which is said to enable a person to command respect from kings. This work is attributed to Śaṅkarācārya.

Beginning:

सुवक्षोजकुम्भां सुधापूर्णकुम्भां प्रसादावलम्बां प्रपुण्यावलम्बाम् ।
सदा सेन्दुबिम्बां सरागोष्ठबिम्बां भजे शारदाम्बामजस्रं मदम्बाम् ॥
कटाक्षे दयार्द्रां करे ज्ञानमुद्रां कलानिर्विनिद्रां कलापैः सुभद्राम् ।
See under the next number for the end.

No. 9966. गोपालस्तवः.
GŌPĀLASTAVAḤ.

Substance, palm-leaf. Size, $19\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 7. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Paścimaraṅgarājastava 4*b*, Paravāsudēvastōtra 30*a*.

Wants the first 14 stanzas.

Similar to the above.

See under the previous No. for the beginning.

End:

पुरतः पुरतोऽनिशं ममाक्ष्णोः स्फुरदिन्दीवरपुञ्जमञ्जुलाङ्गम् ।
वदने मुरलीं करे गिरिं वा वहदेकं महितं महः समिन्धाम् ॥

Colophon:

इति श्रीकौशिककुलतिलकश्रीशैलसूरिविरचिते गोपालस्तवः संपूर्ण (र्णः) ॥

No. 9967. गोविन्ददशकम्.
GŌVINDADAŚAKAM.

Pages, 2. Lines, 5 on a page. Character, Nandināgarī.

Begins on fol. 1*a* of the MS. described under No. 8929.

Complete.

Ten stanzas in praise of Gōvinda or Lord Kṛṣṇa, the repetition of which is held to be efficacious in removing one's sins and in obtaining salvation.

Beginning:

हे कृष्ण विष्णो मधुकैटभारे भक्तानुकम्पिन्भगवन्मुरारे ।
त्रायस्व मां केशव लोकनाथ गोविन्द दामोदर माधवेति ॥ १ ॥

End:

गोविन्ददशकं पुण्यं प्रातरुत्थाय यः पठेत् ।
सर्वान्पापानतिक्रम्य विष्णुसायुज्यमाप्नुयात् ॥ १० ॥

No. 9968. गोविन्ददशकम्.
GŌVINDADAŚAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 26*b* of the MS. described under No. 9534, wherein this work has been mentioned as Gōvindadarśana in the list of other works given therein.

Same work as the above, but with the addition of one stanza in the beginning as given below :—

हरे मुरारे पुरुषोत्तमेति जिह्वेऽनिशं कीर्त(य) केशवेति ।
कृष्ण। यदाकन्त(न्द)दनन्यनाथा गोविन्द दामोदर माधवेति ॥

No. 9969. गोविन्दाष्टकम्.
GŌVINDĀṢṬAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 411.

Complete.

Eight stanzas describing the sports of Gōvinda or Lord Kṛṣṇa who is here identified with the attributeless Supreme Being

Beginning:

सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं
गोष्ठप्राङ्गणरिङ्खणलोलमनायासं परमायासम् ।

मायाकल्पितनानाकारमनाकारं भुवनाकारं
क्ष्मामानाथमनाथं प्रणमत गोविन्दं परमानन्दम् ॥ १ ॥

End :

गोविन्दाष्टकमेतदधीते गोविन्दार्पितचेता यो
गोविन्दाच्युत माधव विष्णो गोकुलनायक कृष्णेति ।
गोविन्दाङ्घ्रिसरोजध्यानसुधाजलधौतसमस्ताघो
गोविन्दं परमानन्दामृतमन्तःस्थं स समभ्येति ॥

श्रीकृष्णामृताय विद्महे गीताशास्त्राय धीमहि । तदेकं निष्कलङ्कं ब्रह्म । तन्नः पार्थः प्रचोदयात् ॥

No. 9970. गोविन्दाष्टकम्.
GŌVINDĀṢṬAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 9920.

Complete.

Same work as the above, but with the addition of one stanza in the beginning as given below and without the Gāyatrī given at the end :—

गोविन्द नमो गोविन्द गोविन्द नमो गोविन्दम् ।
गोविन्द नमो गोविन्द नमो गोविन्दं परमानन्दम् ॥

No. 9971. गोविन्दाष्टकम्.
GŌVINDĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 189*a* of the MS. described under No. 316.

Complete.

Same work as the above.

No. 9972. गोविन्दाष्टकम्.
GŌVINDĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 58*b* of the MS. described under No. 9706.

Contains the last three stanzas only.

Same work as the above, but with the addition of a few extra stanzas at the end.

No. 9973. गोविन्दाष्टकम्—सव्याख्यानम्.

GŌVINDĀṢṬAKAM WITH COMMENTARY.

Pages, 24. Lines, 16 on a page. Character, Dēvanāgarī.

Begins on fol. 43*a* of the MS. described under No. 412.

Complete.

Same work as the above, but with a commentary which, according to the colophon found herein, is also the production of Śaṅkarācārya.

Beginning:

श्रीमत्पूर्णात्मकृष्णस्य पदपङ्केरुहद्वयम् ।
प्रणम्य क्रियते टीका गोविन्दाष्टकगामिनी ॥

इह खलु सकललोकहितावतारो भगवान् श्रीमहाविष्णुर्भूवनितया- भ्यर्थितो भूभारपरिजिहीर्षया यदुकुले अवतीर्णः सनकादिमुनिजनैरनुगीय- मानस्वचरितो नन्दवेश्मनि विजहार । तमेव विहारमष्टभिः श्लोकैरुपवर्ण- यति(न्) भगवत्पादमुनिः निरस्तसमस्तदोषं सच्चिदानन्दाह्वयं परमात्मानमभि- ष्टौति—

सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं

*   *   *   *

परमश्चासावानन्दश्चेति परमानन्दः तं निरतिशयानन्दम् । गोविन्दमिति— गोभिर्गीर्भिः तत्त्वमस्यादिवाक्यैर्विद्यत उपलभ्यत इति गोविन्दः तं पर- मात्मानं प्रणमत प्रकर्षेण भक्तिश्रद्धातिशयेन नमत वाङ्मनःकायैरर्चयत ।

End:

गोविन्दं परमानन्दामृतमावरणादिरहितमन्तःस्थं स समभ्येति सम्यक् निरुपद्रवः संप्राप्नोति 'मद्भक्ता यान्ति मामपि' इति भगवद्वचनादित्यर्थः ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृता गोविन्दाष्टकटीका समाप्ता ॥

No. 9974. गोविन्दाष्टकम्—सव्याख्यानम्.
GŌVINDĀṢṬAKAM WITH COMMENTARY.

Pages, 14. Lines, 6 on a page.

Begins on fol. 189*b* of the MS. described under No. 316.

Complete.

Same work as the above.

No. 9975. गोविन्दाष्टकव्याख्या.
GŌVINDĀṢṬAKAVYĀKHYĀ.

Pages, 22. Lines, 5 on a page.

Begins on fol. 53*a* of the MS. described under No. 9066.

Complete.

Same commentary as the above.

No. 9976. गौतमस्तोत्रम्.
GAUTAMASTŌTRAM.

Size, 8⅝ × 1¾ inches. Pages, 6. Lines, 5 on a page. Character, Kanarese.

Begins on fol. 23*a* of the MS. described under No. 8920.

Complete.

In praise of God Raṅganātha worshipped at Śrīraṅgapaṭṭaṇa in Mysore: said to be by Gautama.

Beginning:

जय सर्वार्थतच्छील जय सद्भोग्यसद्गुण ।
जय पन्नगपर्यङ्क जय पद्मायतेक्षण ॥

देवेश भिन्नदैत्याङ्ग देवर्षिध्यानदुर्ग्रह ।
दिव्यलोक दयासिन्धो श्रीरङ्गेश नमोऽस्तु ते ॥

End :

यं यं कामयते कामं तं तमाप्नोत्यसंशय(म्) ।
इत्युपश्लिन्दि(पांश्वीडि)तः स्तोत्रं गौतमः परया मुदा ॥

Colophon :

इति पश्चिमरङ्गमाहात्म्ये गौतमस्तोत्रं संपूर्णम् ॥

No. 9977. चतुर्भद्रिकास्तोत्रम्.

CATURBHADRIKĀSTŌTRAM.

Pages, 22. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9956.

Complete.

A hymn in praise of Vēṅkaṭēśa worshipped at Tirupati written in a peculiar form of composition called Caturbhadrika.

Beginning :

श्रीभामालिङ्गनस्पन्दितकुचयुगलीकुङ्कुमस्फारगौर-
च्छाया[दायया]सत्कौस्तुभोरुं(रः)स्फुरदुरुचपलानीलपर्जन्यकान्ते ।
वक्ष्येऽहं वेङ्कटाद्रीशितुरनघगुणश्लाघनीया मदीया
बुद्धा स्वल्पा तथाप्युज्ज्वलचतुरचतुर्भद्रिकां भद्रदात्रीम् ॥

जय जय जगदवनजागरूककृपाकटाक्षलक्ष्मीलक्षितवक्षःस्थल संतत-
निजसेवामहोत्सवसमागतसुपर्वविलासिनीकरकङ्कणकिङ्किणीझणझणात्कार ।

End :

श्रीविङ्कटवर रक्ष रमेश मां त्रायस्व महेश देव ॥

वासस्थेन हि रामचन्द्रकविना श्रीवेङ्कटाधीश्वर-
श्रीपादाब्जसमर्पितामतितरप्रौढां चतुर्भद्रिकाम् ।
यः श्रूयेत पुनः(प)ठेदिह लभेद्दीर्घायुरारोग्यतां
लक्ष्मीं विन्दति सोऽनुगच्छति मनोवाञ्छां सुमोक्षं ततः ॥

लोकेशं वेदकोशं सदलिकविलसत्पद्मनेत्रं पवित्रं
श्रीवासं चारुहासं प्रशमितविबुधद्वेषिबृन्दं मुकुन्दम् ।
श्रीमूर्तिं दिव्यकीर्तिं भुजबलशमितोद्यद्धिरण्यं शरण्यं
सर्वेशं वेङ्कटेशं भज भज हृदय ब्रह्मतातं सदा तम् ॥

Colophon:

चतुर्भद्रिका समाप्ता ॥

No. 9978. चरणचिह्नवर्णनम्.
CARAṆACIHNAVARṆANAM.

Pages, 4. Lines, 26 on a page.

Begins on fol. 88*a* of the MS. described under No. 2981.

Complete.

In praise of the distinguishing marks in the feet of Lord Kṛṣṇa: by Harirāya.

Beginning:

प्रणम्य ब्रह्मरुद्रादिवन्दनीयपदाम्बुजम् ।
वर्णये पदचिह्नानि सदनानि शुभाशिषाम् ॥
यद्ध्यानाच्चेतोऽपि षोडशकलमञ्जसा भवति ।
नखचन्द्रपूर्णतोयैः षोडशसंख्यानि तानि जातानि ॥
दक्षिणवामपदद्वयचिह्नानां चिन्तनाद्भवति ।
दाक्षिण्यं वा स्वमतस्वरूपसंप्राप्तये नृणाम् ॥

End:

ये भावयन्ति सततं परिशीलयन्ति
ये वा स्मरन्ति बहुशोऽप्यथ कीर्तयन्ति ।
चिह्नानि गोकुलपतेश्चरणस्थितानि
तेषां भवेच्चरणपङ्कजमातृभावः ॥
इति हरिरायनिरूपितमभवत्पादाब्जयोः प्रकटम् ।
चिह्नानां वर्णनमिह तेन हरिर्मम प्रसन्नोऽस्तु ॥

Colophon:

इति श्रीहरिरायनिरूपितं चरणचिह्नवर्णनं संपूर्णम् ॥

No. **9979.** जन्मवैफल्याष्टकम्.

JANMAVAIPHALYĀṢṬAKAM.

Page, 1. Lines, 28 on a page.

Begins on fol. 103*b* of the MS. described under **No. 2981.**

Complete.

Eight stanzas describing the utter uselessness of the life of a person who does not worship Kṛṣṇa, the Lord of Rādhā: by Haridāsa.

Beginning:

नाश्रितो वल्लभाधीशो न च दृष्टा सुबोधिनी ।
नाराधि राधिकानाथो वृथा तज्जन्म भूतले ॥ १ ॥

न गृहीतं हरेर्नाम नात्माद्यखिलमद्भुतम् ।
न कृष्णसेवा वितता वृथा तज्जन्म भूतले ॥ २ ॥

न लीला चिन्त्यते नैव दीनता विरहाद्धरेः ।
न वा कृष्णाश्र(श)यः पूर्णो वृथा तज्जन्म भूतले ॥ ३ ॥

End:

न निजस्वामिविरहपरितापो न भावना ।
न दैन्यं परमं यस्य वृथा तज्जन्म भूतले ॥ ८ ॥

Colophon:

इति श्रीहरिदासोक्तं जन्मवैफल्याष्टकं संपूर्णम् ॥

No. **9980.** जितन्तेस्तोत्रम्.

JITANTESTŌTRAM.

Pages, 12. Lines, 13 on a page.

Begins on fol. 9*a* of the MS. described under **No. 2398**

Complete in five Adhyāyas.

Same work as that described under R. No. 174(s) of the Triennial Catalogue of MSS., Vol. I, Part I-A, which contains the second Adhyāya only.

The transcription of this manuscript is said to have been completed on Monday, the 6th day of the bright fortnight of the lunar month of Āśvayuja, in the year Citrabhānu.

Beginning:

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥
नमस्ते वासुदेवाय शान्तानन्तचिदात्मने ।
अध्यक्षाय स्वतन्त्राय निरपेक्षाय शाश्वते ॥

* * * *

अज्ञानाद्यदि वा ज्ञानादशुभं च कृतं मया ।
तत्क्षन्तव्यमशेषेण दास्येन च गृहाण माम् ॥

Colophon:

इति श्रीपाञ्चरात्रागमे श्रीमदष्टाक्षरीकल्पे ब्रह्मनारदसंवादे जितंते-स्तोत्रं नाम प्रथमोऽध्यायः ॥

End:

तत्सर्वं क्षम्यतां देव दीनं मामात्मसात्कुरु ।
इति स्तोत्रेण देवेशं स्तुत्वा मधुनिघातिनम् ॥
यागावसानसमये देवदेवस्य चक्रिणः ।
नित्यं किंकरभावेन स्वात्मानं विनिवेदयेत् ॥

Colophon:

इति श्रीपाञ्चरात्रागमे श्रीमदष्टाक्षरीकल्पे ब्रह्मनारदसंवादे जितन्ते-स्तोत्रं नाम पञ्चमोऽध्यायः ॥

No. 9981. जितन्तेस्तोत्रम्.

JITANTĒSTŌTRAM.

Pages, 13. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 3056.

Contains the Adhyāyas in the following order:—2nd, 3rd, 5th, 4th and 1st complete.

Same work as the above.

No. 9982. जितन्तेस्तोत्रम्.

JITANTĒSTŌTRAM.

Pages, 18. Lines, 6 on a page.

Begins on fol. 12*a* of the MS. described under No. 7096.

Contains the Adhyāyas in the order 2nd, 5th and 1st.

Same work as the above.

No. 9983. जितन्तेस्तोत्रम्.

JITANTĒSTŌTRAM.

Pages, 10. Lines, 8 on a page.

Begins on fol. 134*a* of the MS. described under No. 9706.

Complete in five Adhyāyas given in the order 5th, 3rd, 1st, 4th and 2nd.

Same work as the above.

No. 9984. जितन्तेस्तोत्रम्.

JITANTĒSTŌTRAM.

Pages, 3. Lines, 10 on a page.

Begins on fol. 14*a* of the MS. described under No. 3877.

Contains the second Adhyāya only.

Same work as the above.

No. 9985. जितन्तेस्तोत्रम्.
JITANTÊSTÔTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 27*b* of the MS. described under No. 9652.

Contains the second Adhyâya only.

Same work as the above.

No. 9986. जितन्तेस्तोत्रम्.
JITANTÊSTÔTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 2'*b* of the MS. described under No. 9534

Contains the second Adhyâya only.

Same work as the above.

No. 9987. जितन्तेस्तोत्रम्.
JITANTÊSTÔTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 8904.

Contains the second Adhyâya only.

Same work as the above.

No. 9988. जितन्तेस्तोत्रम्.
JITANTÊSTÔTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 2*a* of the MS. described under No. 9661.

Contains the second Adhyâya only.

Same work as the above.

No. 9989. जितन्तेस्तोत्रम्.

JITANTÊSTÔTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 90*a* of the MS. described under No. 9001.

Contains the second Adhyâya only with the addition of the three stanzas in the end as given below.

Same work as the above.

End:

कर्मणा मनसा वाचा या चेष्टा मम नित्यशः ।
केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि ॥
कावेरी वर्धतां काले काले वर्षतु वासवः ।
श्रीरङ्गनाथो जयतु श्रीरङ्गश्रीश्च वर्धताम् ॥
श्रीस्तनाभरणं तेजः श्रीरङ्गेशयमाश्रये ।
चिन्तामणिमिवोद्भ्रान्तमुत्सङ्गे नतभोगिनः ॥

No. 9990. जितन्तेस्तोत्रम्.

JITANTÊSTÔTRAM.

Pages, 11. Lines, 6 on a page.

Begins on fol. 20*a* and 51*a* of the MS. described under No. 5777.

Contains the Adhyâyas in the order 5th, 3rd, 1st and 2nd.

Same work as the above.

No. 9991. जितन्तेस्तोत्रम्.

JITANTÊSTÔTRAM.

Pages, 3. Lines, 9 on a page.

Begins on fol. 14*a* of the MS. described under No. 9922.

Contains the third Adhyâya only.

Same work as the above.

No. 9992. जगन्नाथमङ्गलम्.
JAGANNĀTHAMAṄGALAM.

Page, 1. Lines, 4 on a page.

Begins on fol. 12*b* of the MS. described under No 8920, wherein this work has been omitted to be mentioned in the list of other works given therein.

Incomplete.

Benedictory stanzas addressed to God Jagannātha worshipped at Puri in Orissa.

Beginning and **End**:

नीलाचलनिवासाय नित्याय परमात्मने ।
सुभद्राप्राणनाथाय जगन्नाथाय मङ्गलम् ॥
सुभद्राप्राणनाथाय सुभद्राह्वयशालिने ।
बलभद्रसमेताय जगन्नाथाय मङ्गलम् ॥
आप्तकामाय पूर्णाय पुरुषोत्तमशालिने ।
परस्मै पुरुषायास्तु जगन्नाथाय मङ्गलम् ॥

No. 9993. तारावलिः.
TĀRĀVALIḤ

Substance, paper. Size, 9 × 7¼ inches. Pages, 3. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a* and 8*a*. The other works herein are Daivājñabhūṣaṇa 2*a*, Kālakriyānirṇaya 10*a*, Daivajñavilāsa 24*a*.

Complete.

This hymn, consisting of 27 stanzas and hence called Tārāvali, is in praise of Viṣṇu and his incarnations, and seems to be composed by Taḍukamalla Kṛṣṇarāya.

Beginning:

श्रीवत्स(वास)वत्सचिह्नाङ्कितवक्षःस्थल भरासुराजाने ।
त्वमिह दयादृशा मन्दाक्रान्तं रक्ष मां दयाशरधे ॥ १ ॥

कृतयत्नविफलकारिणमतिकष्टदमार्यमात्मजं मन्दम् ।
न स्तौमि तमसुरारे परिमालय मां दयाब्धिदाशरथे ॥ २ ॥

End:

रत्नकिरीटधराच्युत रामानन्त मुकुन्द दयाशरथे ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥
घनतरमुक्ताफलहारमिवादरणीयेयं दाशरथे ।
तारावलिरनिशं सकलानां सौख्यं नितरां वितनोतु ॥ २८ ॥
श्रीतङ्कमल्लवंशोद्भवमनिशं कृष्णरायनामधरम् ।
धरणीसुरवरवन्द्यं परिपालय तं प्रभुं दाशरथे ॥

No. 9994. दत्तात्रेयस्तोत्रम्.

DATTATRĒYASTŌTRAM

Pages, 5. Lines, 4 on a page.

Begins on fol. 10*a* of the MS. described under No. 8920.

Complete.

This work is in praise of Dattātrēya, the son of Atri and Anasūya, and an incarnation of Viṣṇu. He is said to have been an ascetic practising Yōga and to have also taught Yōga to his disciples.

Beginning:

योगीश सर्वलोकानां योगीश परमात्मने ।
सर्वात्मसर्वलोकेश दत्तात्रेय नमोऽस्तु ते ॥
दानवान्तक सर्वेश त्रैलोक्यगृहदीपकः ।
त्राहि मां कृपया देव दत्तात्रेय नमोऽस्तु ते ॥

End:

दत्तात्रेयपदारविन्दमनसा ध्यायन्ति ये मानवाः
[वि]पुला(फुल्ला)म्भोरुहचञ्चरीकभवते ये भुक्तिमुक्तिः सदा ।
भूतप्रेतपिशाचराक्षसहरं दारिद्र्यदैन्याहतं(पहं)
क(वृ)ष्यं पुण्यमिदं फलं च सततं तेजश्च मेधां लभेत् ॥

No. 9995. दत्तात्रेयस्तोत्रम्.
DATTĀTREYASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 48b of the MS. described under No. 5951, and not on fol. 43b as stated in the list of other works given therein

Complete.

Similar to the above.

Beginning:

जटाज(जि)नधरं देवं कोटिचन्द्रप्रकाशकम् ।
भत्यक्षस्मरणान्नित्यं दत्तात्रेय नमोऽस्तु ते ।
* * * *
दत्तात्रेयो हरिः साक्षाद्वसते सह्यपर्वते ।
अनसूयागर्भसंभूतभोगमोक्षशुभप्रदम् ।
भक्तानामिष्टदाताच(रं) दत्तात्रेयमहं भजे ॥

End:

क्षयापस्मारकुष्ठादितापज्वरनिवारणम् ।
* * * *
अनसूयागर्भसंभूत दत्तात्रेय नमोऽस्तु ते ॥

No 9996. दधिवामनस्तोत्रम्.
DADHIVĀMANASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 35b of the MS. described under No. 115.

Complete. From Vāmanapurāṇa.

In praise of Vāmana (dwarf), an incarnation of Viṣṇu, conceived as bearing in his hand a ball of boiled rice mixed with curdled milk (दधि).

Beginning:

हेमाद्रिशिखराकारं शुद्धस्फटिकसंनिभम् ।
पूर्णचन्द्रनिभं देवं द्विभुजं वामनं स्मरेत् ॥

पद्मासनस्थं देवेशं चन्द्रमण्डलमध्यगम् ।
ज्वलत्तारलसत्प्रख्यं तटित्कोटिसमप्रभम् ॥
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
चन्द्रमण्डलमध्यस्थं विष्णुमव्ययमच्युतम् ॥

End:

दधिमिश्रमन्नकबलं रुक्मपात्रं च दक्षिणे ।
करे तु चिन्तयेद्धयायेत्पीयूषममृतं सुधीः ॥

* * * *

एवं स्तोत्रं पठेद्यस्तु प्रातःकाले द्विजोत्तमः ।
अक्लेशादन्नसिद्ध्यर्थं ज्ञानसिद्ध्यर्थमेव च ॥

Colophon:

इति श्रीवामनपुराणे दधिवामनस्तोत्रं संपूर्णम् ॥

No. 9997. दधिवामनस्तोत्रम्.
DADHIVĀMANASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 85*a* of the MS described under No. 633.

Complete.

Same work as the above, but with the following additional passages in the beginning and at the end.

Similar to the above. The form of Vāmana conceived as a lad in the dress of a Vedic student is fully described in the stanzas extracted below.

Beginning:

अस्य श्रीदधिवामनस्तोत्रमन्त्रस्य वामदेवः ऋषिः, अनुष्टुप् छन्दः, श्रीदधिवामनो देवता, दधिवामनप्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

अजिनदण्डकमण्डलुमेखलारुचिरपावनवामनमूर्तये ।
मितजगत्रितयाय जितारये निगमवाक्पटवे वट वन्मेः ॥

अभ्रश्यामः शुभ्रयज्ञोपवीती सत्कौपीनः पीतकृष्णाजिनश्रीः ।
चित्री दण्डी पुण्डरीकायताक्षः पायाद्भूयो वामनब्रह्मचारी ॥

End:

यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते ।
अन्नाधिपतये तस्मै नमोऽस्तु परमात्मने ॥

धवलवपुषमिन्दोर्मण्डले संनिषण्णं रजतझ(च)षकपात्रं शुद्धदध्योदनं च ।
कनककलशतोयं धारयन्तं कराभ्यामलिगणसमकेशं चिन्तये मन्त्रनाथम् ॥

No 9998. दधिवामनस्तोत्रम्.
DADHIVÂMANASTÔTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 51*b* of the MS. described under No. 1872 and not on fol. 51*a* as stated therein.

Complete.

Same work as the above, but the additional stanzas given as the beginning under the last number are herein found at the end.

No. 9999. दधिवामनस्तोत्रम्.
DADHIVÂMANASTÔTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 5953.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

श्रीभूमिसहितं देवं मुक्ताभरणभूषितम् ।
नमामि वामनं विष्णुं भुक्तिमुक्तिप्रदायकम् ॥

No. 10000. दयाशतकम्.
DAYĀŚATAKAM.

Pages, 30. Lines, 6 on a page.

Begins on fol. 50*b* of the MS. described under No. 9388.

Complete.

Same work as that described with commentary under R. No. 633 of the Triennial Catalogue of MSS., Vol. I, Part I–C; but this is complete.

End:

कामं सन्तु मिथःकरम्बितगुणावद्यानि पद्यानि नः
कस्यास्मिञ्छतके सदम्बुकतके दोषश्रुतिं क्षाम्यति ।
निष्प्रत्यूहवृषाद्रिनिर्झरझरत्कारच्छलेनोच्चल-
द्दीनालम्बनदिव्यदम्पतिदयाकल्लोलकोलाहलः ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु कदयाशतं संपूर्णम् ॥

No. 10001. दयाशतकम्.
DAYĀŚATAKAM.

Substance, palm-leaf. Size, 17½ × 1¾ inches. Pages, 29. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Complete.

Same work as the above.

No. 10002. दयाशतकम्.
DAYĀŚATAKAM.

Pages, 11. Lines, 13 on a page.

Begins on fol. *a* of the MS. described under No. 3 50.

Complete.

Same work as the above.

No. 10003. दयाशतकम्.
DAYĀŚATAKAM.

Pages, 10. Lines, 20 on a page.

Begins on fol. 15*a* of the MS. described under No. 2043.

Complete.

Same work as the above.

No. 10004. दयाशतकम्.
DAYĀŚATAKAM.

Pages, 16. Lines, 7 on a page.

Begins on fol. 15*a* of the MS. described under No. 2820.

Wants the last seven stanzas.

Same work as the above.

No. 10005. दयाशतकम्.
DAYĀŚATAKAM.

Substance, palm-leaf. Size, 14¼ × 1¾ inches. Pages, 29. Lines, 5 on a page. Character, Telugu and Grantha. Condition, injured. Appearance, old.

Begins on fol. 59*a*. The other works herein are Sātvatasaṁhitā 1*a*, Durvāsasaṁhitā 30*a*, Śāṇḍilyasaṁhitā 47*a*, Sudarśanahōmapaddhati 74*a*.

Breaks off in the 83rd stanza.

Same work as the above.

No. 10006. दयाशतकम्.
DAYĀŚATAKAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 9012.

Complete.

Same work as the above.

No. 10007. दयाशतकम्—सव्याख्यानम्.
DAYAŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 138. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Said to have been copied by Śrīnivāsa, son of Gōpālārya of Śrīvatsagōtra.

Same work as the one described under R. No. 633 of the Triennial Catalogue of MSS., Vol. I, Part I-C, but with a different introduction as given below :—

वेदान्ताचार्यता यस्य कवितार्किकसिंहता ।
स्पृ(स्प)ष्टा दृष्टा प्रबन्धेषु तमेवार्यं सदा भजे ॥
यद्यपि पूर्वव्याख्या तथापि तत्रापरीतोषात् ।
सद्भिर्नियमितश्च(ए)वं विदधामि मुदे तथा तेषाम् ॥

End :

एवं स्वनैच्यानुसंधानपूर्वं प्रबन्धावतारमवधाय दोषवत्त्वेऽपि दोषोद्घाटनं न सहते इति परिसमापयति—

* * * *

दीनालम्बनदिव्यदंपतिदयायाः कल्लोलकोलाहलः तरङ्गकलकलः क्षाम्यति सहते ; न कस्यापि क्षाम्यतीत्यर्थः, निराकरोतीति यावत् । आलम्बनपदं नित्यनपुंसकम् । श्रीनिवासत्वात् दिव्यदम्पतीत्युक्तिः ॥

Colophon :

इति श्रीमदात्रेयगोत्रभूषायमाणवेङ्कटनिवासविरचितेषु दयाशतकव्याख्यानं संपूर्णम् ॥

The scribe adds—

श्रीम(व)त्सगोत्रोद्भवेन श्रीमद्गोपालार्यपुत्रेण श्रीनिवासाभिधेयेन दयाशतकं व्याख्यानसहितं लिखितम् ॥

No. 10008. दयाशतकम्—सव्याख्यानम्.

DAYĀŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 13¾ × 1½ inches. Pages, 111. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 22*a*. The other work herein is Yatirājasaptativyākhya 1*a*.

Breaks off in the 101st stanza.

Same work as the above, but with the introductory stanzas as given below.

Beginning:

विशुद्धविज्ञानघनस्वरूपं . . देवं हयग्रीवमहं प्रपद्ये ॥
प्राची सन्ध्या काचिदन्तर्निशायाः . . वागीशाख्या वासुदेवस्य मूर्तिः॥
शुक्लाम्बरधरं विष्णुं . सर्वविघ्नोपशान्तये ॥
अस्मद्गुरून् सदाचार्यान्परमाचार्यानपि क्रमात् ।
श्रीदयाशतकं व(व्य)क्तीकरोमीह विचिन्तयन् ॥
आत्रेयगोत्रतिलकं श्रीशेषाचलदेशिकम् ।
नमामि कृत्स्नतन्त्रेषु स्वतन्त्रमतिवैभवम् ॥
श्रीमद्रामानुजाचार्यं सेवे त्रय्यन्तसन्ततौ ।
निष्णातमनसां स्पष्टं दृष्टान्तं प्रथमं सताम् ॥
श्रीमद्वाधूलवरदगुरुं वन्दामहे यतः ।
विस्याति प्रबलास्पर्शो येन पाषण्डिनो जिताः ॥

No. 10009. दयाशतकम्—सव्याख्यानम्.

DAYĀŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 90. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete. The manuscript is said to have belonged to Paravastu Śrīnivāsa-Rāmānujācārya.

The commentary herein contained is different from that described under the last number. The commentator is Śrīnivāsa of Vadhūlagōtra.

Beginning:

वन्दामहे महाचार्यपादपाथोरुहद्वयम् ।
यत्प्रसादान्मदीयापि मतिस्तत्त्वार्थवेदिनी ॥
कवितार्किकसिंहस्य पादयोः प्रणतोऽस्म्यहम् ।
दयास्तवमिषावेन दर्शितं देहिनां हितम् ॥

इह खलु कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो वेदान्ताचार्यः श्रीमद्वेङ्कटनाथार्यः प्रतिबन्धनिवृत्तिपूर्वकं परमपुरुषपदकमलपरिचरणरूपं परमपुरुषार्थमभिलषतो जनस्य भगवद्दयैव निरपायोऽभ्युपाय इति उपदेशपरंपरया प्राप्तं रहस्यमर्थं करुणावशेन तद्दयास्तुतिव्यपदेशेन प्रकाशयितुं प्रवृत्तः प्रथमदशकेन प्रारिप्सितप्रबन्धपरिसमाप्तिप्रत्यूहप्रशमनापेक्षयास्य च रहस्यार्थस्य गुरुपरंपराप्रसादलब्धत्वेन तांस्तान्प्रणमन् वर्तिष्यमाणार्थमपि प्रतिजानीते। तत्र प्रथमं तेषामपि दयालौ भगवति भरन्यासस्य श्रीमद्वृषाद्रिणा तस्य प्रकाशने सत्येव सुकरत्वात् परमोपकारितया भगवत्तत्त्वप्रकाशनेनैव गुरुकोटिनिविष्टतया तं दयापरिणामत्वेन स्तुवन् नमस्यति—

प्रपद्ये तं गिरिं प्रायः . . यन्मूर्त्या शर्करायितम् ।

तं वक्ष्यमाणप्रकारविशिष्टम् । गिरिमिति सामान्योक्तावपि श्रीनिवासानुकम्पयेत्युक्ते वेङ्कटाद्रिनाथदयासमभिव्याहारात् वेङ्कटरूपविशेषणसिद्धिः, श्रीनिवासशब्दस्य वेङ्कटनाथे प्रसिद्धिप्राचुर्यात् ।

End:

यदा अस्मिञ्छतके कश्चिद्दोषमुद्भावयति तया(दा)दिव्यदंपतिदयाकल्लोलकोलाहल एव दीनपक्षपाततया वृषाद्रिनिर्झरझरत्कारव्याजेन विजृम्भमाणो दिशामुखानि मुखरयित्वा दोषोद्भवतः श्रवणं वारयति । वृषाद्रिनिर्झरझरत्कारैः दिशां मुखरीकरणं मदीयकृतिविषयदोषोद्भावनाश्रवणार्थं दव(या) कारितम् । एवं च दोषोद्भावनश्रवणमपि सा न क्षमते । सा कथं दोषोद्भावनं क्षाम्यतीति तात्पर्यमिति सर्वमनवद्यम् ॥

कवितार्किकसिंहार्यकृपया कृतिना कृता ।
वाधूलश्रीनिवासेन दयाशतकदीपिका ॥
कथं मयावसेयार्थो कवितार्किकसिंहगीः ।
तथापि मुग्धसंजल्पलुब्धैर्ग्राह्या त्वियं बुधैः ॥

Colophon:

इति वाधूलश्रीनिवासकृतौ दयाशतकव्याख्या संपूर्णा ॥

No. 10010. दयाशतकम्—सव्याख्यानम्.
DAYĀŚATAKAM WITH COMMENTARY

Substance, palm-leaf. Size, 16⅞ × 1⅛ inches. Pages, 50. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

The text breaks off in the 48th stanza and the commentary in the 43rd stanza.

Same work as the above.

No. 10011. दयाशतकम—सव्याख्यानम्.
DAYĀŚATAKAM WITH COMMENTARY

Substance, palm-leaf. Size, 15¼ × 1⅛ inches. Pages, 34. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the 47th stanza.

Same work as the above, but with the addition of two stanzas in the beginning as given below :—

श्रीमद्वेङ्कटनाथार्यपदद्वन्द्वमुपास्महे ।
तर्कवेदान्तमीमांसानिष्णातं यस्य मानसम् ॥
वाधूलश्रीनिवासार्यपदाब्जरजसे नमः ।
यद्दूरीकरणाद्दूरीभवेद्भवमहार्णवः ॥

No. **10012.** दयाशतकव्याख्या.

DAYĀŚATAKAVYĀKHYĀ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 124. Lines, 10 on a page. Character, Grantha. Condition, fair. Appearance, old.

Incomplete.

Breaks off in the 66th stanza.

Another commentary on the Dayāśataka, written by Rāmānujācārya of Hāritagōtra as taught to him by Sudarśana of Kauśikagōtra.

Beginning :

जीयाच्छ्रीरामचन्द्रार्यो हारीतकुलभूषणः ।
वेदान्तयुग्मं व्याकुर्वन् भूमावाचन्द्रतारकम् ॥
पदाम्बुजपरिष्कृतस्फुरितपत्रपद्मासनं
कटीतटविराजता कनकवाससालंकृतम् ।
रमाचरणलाक्षया लसदुरस्कमाविःस्मितं
वृषाद्रिरमणं स्तुमः कलमकान्तदिव्याकृतिम् ॥
एकं शरेण धनुषा कलयन्तमन्यं
म(मा)न्यं करं स्थितिविशेषविशेषरम्यम् ।
देव्यानुजेन च परिष्कृतपार्श्वयुग्मं
रामं मदीयकुलदैवतमाश्रयामि ॥
अनुसंदधाति भावं कौशिकहेतीन्द्रदेशिकाल्लब्धम् ।
रामानुजार्यदासो दयास्तुतेर्वेङ्कटेशस्य ॥

. . . .

इत्युक्तप्रक्रिययाकिंचनाधिकारिणो भगवद्दयैकनिष्ठत्वेन तस्या एव स्तोतव्यत्वात् तां स्तोतुकामोऽयं कवितार्किककेसरी वेदान्तदेशिकः प्रथमं स्वाश्रयाया दयाया आविर्भावभूमित्वेन परमोपकारकयेत्यादिस्थलवैभवो . . . . ति न्यायेन श्रीवेङ्कटपतेरप्यतिशयावायकं श्रीमन्तं वेङ्कटगिरिं नमस्यति—

प्रपद्ये . . . . शर्करायितम् ।

अत्र इक्षुसारत्वबन्त्येव स्थितया श्रीनिवासानुकम्पया प्रायो यन्मूर्त्या शर्करायितं तं गिरिं प्रपद्य इत्यन्वयः ।

End:

तत्प्रसङ्गाद्भगवदौदार्यकार्यं चतुर्मुखादेः परमेष्ठ्याद्यैश्वर्यमुत्तरोत्तराभिवर्धनेन परिपालयसीत्याह —

त्वया दृष्टस्तुष्टिं भजति परमेष्ठी निजपदे वहन्मूर्तीरष्टौ.

No. 10013. दशावतारमञ्जरी.

DAŚĀVATĀRAMAÑJARĪ.

Pages, 5. Lines, 20 on a page.

Begins on fol. 77*a* of the MS. described under No. 1904.

Complete.

This is a hymn in praise of the ten incarnations of Viṣṇu composed by Śēṣādrisūri, son of Vēṅkaṭēśvarasūri of Ātrēyagōtra and a disciple of Rāmadhvarin, at the instance of the king, Bhīmarāya, who is said to be a descendant of Śrīraṅgabhūpati and to have reigned at Dharmapuri. The author, who wrote a commentary on his own work, states there that it was composed in the Mēṣa month of the year Vikrama corresponding to 4861 of the Kaliyuga, *i.e.*, 1760 A.D., and that he was requested by the king to compose the stanzas so that they may form a panegyric of himself as well as of God Viṣṇu.

Beginning:

प्रणम्य रामयज्वमौलिरत्नपादपङ्कजं

सरस्वतीपदाम्बुजद्वयं च शेषसूरिणा ।

विरच्यतेऽद्य भीमराजनामकल्पभूरुहे

विलासिनी बुधालिका दशावतारमञ्जरी ॥ १ ॥

भीमेन्द्रोश्चतुरक्षरीविलसते नाम्नि स्वकीयां धियं

सम्यक् शोधयितुं दशावतरणं लक्ष्मीपतेरद्भुतम् ।

यत्किञ्चित्प्रतिपादितं बुधजनाह्लादाय शेषाद्रिणा
श्रीरामाध्वरिणः कृपाबलभराच्छ्लोकैः प्रचाकारयते ॥ २ ॥
सम्यगसम्यग्वा मम गदितं विदुषां मुदं तनोत्येव ।
अस्पष्टवर्णबालकवचनं पित्रोर्मुदं तनोति न किम् ॥ ३ ॥
पुष्करिवासो विबुधभृदचलोदयकृद्धिरण्यदक्षिपदः ।
ज्याभृदवः कुशलवसुः शौरिर्म्लेच्छध्वदेष भीमेन्दुः ॥ ४ ॥

End:

मुक्ताः केलिविमर्दसूत्रगलिताः संशोधनीपुञ्जिताः
सौवर्णारुणरत्नभूमिषु हरिच्छोणा मृगाः कीरकाः ।
आकर्षन्ति यदत्र बालकतृणभ्रान्त्याकरा दाडिमी-
बीजभ्रान्तिजुषश्च तद्धवगृहे भीमेन्दुलीलायितम् ॥ १६ ॥
विचार्य विज्ञैरतिसूक्ष्मया धिया दोषो वितीर्णोऽत्र यथा करोति मे ।
तुष्टिं तथाज्ञैः शिरसः प्रकम्पनैर्दत्तो गुणो नैव चरीकरीति ॥ १७ ॥
यदि सन्ति गुणाः केचिच्छिरसा श्लाघयन्तु तान् ।
दोषाश्चेन्मत्सरं त्य । बुधाः परिहरन्तु तान् ॥ १८ ॥

Colophon:

इति श्रीराजमान्यराजश्रीरङ्गभूपतिवतंसकुलजलधिचन्द्रेण राजश्री-भीमरायभूपालमणिना नियुक्तेन श्रीशेषाद्रिसूरिणा कृता दशावतारमञ्जरी संपूर्णा ॥

No. 10014. दशावतारमञ्जरीप्रदीपिका—परिमलः.

DAŚĀVATĀRAMAÑJARĪPRADĪPIKĀ : PARIMALAḤ.

Pages, 27. Lines, 20 on a page.

Begins on fol. 79*a* of the MS. described under No. 1904.

Complete.

A commentary on the work described under the last number: by Śeṣādrisūri, the author of the text.

Beginning :

प्रणम्य रामाध्वरिणः पदाम्भोजं प्रदीपिकाम् ।
दशावतारमञ्जर्याः कुर्वे परिमलाभिधाम् ॥

इह खलु निखिलविद्वज्जनमुखारविन्दनिर्गलप्रवहदपारसकलशास्त्रकदम्बपुञ्जपयोराशिं निरुपमनिजयुक्तिभरमन्दराद्रिणा निर्मथ्य तत्रत्ययुक्तिसारामृतमुद्धृत्य तान् विबुधजनान् सामाजिकानपि सततमानन्दयता समस्तविबुधजनभूषितभूलोकवैकुण्ठधारापुरीमध्यस्थलीराराज्यमानरत्नसिंहासनाधिरूढेन

* * * *

श्रीमद्राजाधिराजभीमभूपालमणिना मदभिधानमपि भगवत्परं करणीयमिति नियुक्तः तदीयप्रीतिनवमालिकागुच्छायमानः कश्चन शेषाद्रिनामा विपश्चित प्रारिप्सिताया दशावतारमञ्जर्या अविघ्नेन परिसमाप्तये

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इति श्रुत्वा गुरुचरणारविन्दप्रणामस्यैव लोकोत्तरश्रेयःसाधनतया निरर्गलवाणीविलासस्य शारदाम्बाचरणाम्बुजनमनाधीनतया मनसानुष्ठितं तदुभयप्रणामात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थे निबध्नन् श्रोतुमनःप्रणिधानाय चिकीर्षितं प्रतिजानीते—प्रणम्येति । रामः रामस्वामिदीक्षित एव यज्वमौलिरत्नं दीक्षितशिरोमणिः तस्य पादपङ्कजं चरणाम्बुरुहं

* * * *

दशावतारमञ्जरी भगवतो दशानां मत्स्यादीनामवताराणां मञ्जरी मञ्जरीवदाधारभूता; तदाख्यो ग्रन्थ इति यावत् । अद्य एकषष्ट्युत्तराष्टशतीसहितचतुःसहस्रेषु कलियुगवर्षेषु गतेषु वर्तमाने विक्रमसंवत्सरमेषमासे विरच्यते क्रियत इत्यर्थः । अत्र प्रकृतग्रन्थस्य मञ्जरीत्वनिरूपणादवताराणां कुसुमत्वारोपो गम्यते ।

End:

विचार्येति श्लोकस्य, यदि सन्तीति श्लोकस्य च स्पष्टोऽर्थः ॥

विराजितोऽष्टादशभिश्च पर्वभिर्विभूषितो भारत एव कौतुकात् ।
भीमेन्दुरूपोऽयमिति प्रबोधयेत् श्लोकैरियद्भिः स्वमलंकृताकृतिः ॥

Colophon:

इति श्रीराजमान्यराजश्रीरङ्गय्यभूपतिवतंसकुलजलधिचन्द्रेण राजश्रीभीमरायभूपालमणिना नियुक्तेन श्रीमदात्रेयकुलतिलकश्रीवेङ्कटेश्वरसूरिमणिसूनुना श्रीशेषाद्रिसूरिवर्येण कृता परिमलाख्या दशावतारमञ्जरीप्रदीपिका संपूर्णा ॥

No. 10015. दशावतारसुप्रभातम्.

DAŚĀVATĀRASUPRABHĀTAM.

Pages, 8. Lines, 3 on a page.

Begins on fol. 1a of the MS. described under No. 9906.

Complete.

Stanzas wishing good morning to the ten incarnations of Viṣṇu.

Beginning:

वेदापहारकमहासुरमर्दनाय भूदेवदेवकुलसौख्यविवर्धनाय ।
औदार्यकीर्तिशुभसंपदकारणाय मत्स्यावतार सततं मम सुप्रभातम् ॥१॥

End:

मत्स्यादिकच्छपवराहनर(नृ)सिंहरूपं श्रीवामनं परशुरामनृपाभिरामम् ।
श्रीरामकृष्णबुधकल्किदशावतारं मङ्गल्यसंपदकरं मम सुप्रभातम् ॥

ब्रह्मा मुरारिस्त्रिपुरान्तकश्च भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रश्च शनिश्च राहुः केतुश्च सर्वे मम सुप्रभातम् ॥

सुप्रभाताद्गुर(द)जनि मधुरावासयोषित(ता)म् ।
प[ा]श्यन्त्यच्युतवक्त्राभ्यां यासां नेत्रालिपङ्क्तयः ॥

No. 10016. दशावतारसुप्रभातम्.
DAŚĀVATĀRASUPRABHĀTAM.

Substance, palm-leaf. Size, 9¼ × 1 inches. Pages, 6. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1a. The other works herein are Mahāpuruṣacaraṇāravindastōtra 3b, Raṅganāthastōtra 5a, Rāmastōtra 7b.

Complete.

Same work as the above, but with a different end as given below:—

राजाधिराजरघुनन्दनरामबौद्ध-
कल्क्यारोग्यमाग्य(दि)संपदकरो मम सुप्रभातम् ॥
मत्स्यः कूर्म(र्मो)वराहश्च नारसिंहश्च वामनः ।
रामो रामश्च रामश्च बौद्धः कल्किमेव च(ल्की जनार्दनः) ॥

No. 10017. दशावतारस्तोत्रम्.
DAŚĀVATĀRASTŌTRAM.

Pages, 4. Lines, 24 on a page.

Begins on fol. 10b of the MS. described under No. 5959.

Complete.

In praise of the ten incarnations of Viṣṇu: by Vēdāntadēśika.

Beginning:

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥
देवो नः शुभमातनोतु दश[त]धा निर्वर्तयन् भूमिकां
रङ्गे धामनि लब्धनिर्भररसैरध्याक्षितो भावुकैः ।
यद्भावेषु पृथग्विधेष्वनुगुणान् भावान् स्वयं बिभ्रती
यद्धर्मैरिह धर्मिणी विहरते नानाकृतिर्नायिका ॥
निर्मग्नश्रुतिजालमार्गणदशादत्तक्षणैर्वीक्षणै-
रन्तस्तन्वदिवारविन्दगहनान्यौदन्वतीनामपाम् ।

निष्प्रत्यूहतरङ्गरिङ्खणमिथःप्रत्यूढपादच्छ(श्छ)टा-
डोलारोहसदोहलं भगवतो मात्स्यं वपुः पातु नः ॥

End:

इच्छामीन विहारकच्छप महापोत्रिन् यदृच्छाहरे
रक्षावामन रोषराम करुणाकाकुत्स्थ हेलाहलिन् ।
क्रीडावल्लव कल्किवाहन दशाकल्किन्निति प्रत्यहं
जल्पन्तः पुरुषाः पुनन्ति भुवनं पुण्यौघपण्यापणाः ॥
विद्योदन्वति वेङ्कटेश्वरकवौ जातं जगन्मङ्गलं
देवेशस्य दशावतारविषयं स्तोत्रं विवक्षेत यः ।
वक्त्रे तस्य सरस्वती बहुमुखी भक्तिः परा मानसे
शुद्धिः कापि तनौ दिशासु दशसु ख्यातिः शुभा जृम्भते ॥
कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

No. 10018. दशावतारस्तोत्रम्.

DAŚĀVATĀRASTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 116 of the MS. described under No. 9390.
Complete.
Same work as the above.

No. 10019. दशावतारस्तोत्रम्.

DAŚĀVATĀRASTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 33b of the MS. described under No. 8900.
Complete.
Same work as the above.

No. 10020. दशावतारस्तोत्रम्.
DAŚĀVATĀRASTŌTRAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 2408.

Breaks off in the 5th stanza.

Same work as the above.

No. 10021. दशावतारस्तोत्रम्.
DAŚĀVATĀRASTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 8904.

Complete.

Same work as the above.

No. 10022. दशावतारस्तोत्रम्.
DAŚĀVATĀRASTŌTRAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 71*a* of the MS. described under No. 8904.

Wants the first four stanzas; otherwise complete.

Same work as the above.

No. 10023. दशावतारस्तोत्रम्.
DAŚĀVATĀRASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 139*a* of the MS. described under No. 9388.

Breaks off in the eighth stanza.

Same work as the above.

No. 10024. दशावतारस्तोत्रम्.
DAŚĀVATĀRASTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 59*a* of the MS. described under No. 5777.

Complete.

Same work as the above.

No. 10025. दशावतारस्तोत्रम्.
DAŚĀVATĀRASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 296*b* of the MS. described under **No. 9001.**

Breaks off in the tenth stanza

Same work as the above.

No. 10026. दशावतारस्तोत्रम्.
DAŚĀVATĀRASTŌTRAM.

Pages, 4. Lines, 12 on a page.

Begins on fol. 49*b* of the MS. described under **No. 206.**

Complete.

Same work as the above but, with the addition of one stanza at the end as given below —:

श्रीरङ्गार्यपदाम्भोजद्वन्द्वसङ्कैकजीवितम् ।
वेदान्तद्वयनिष्णातं लक्ष्मणार्यमहं भजे ॥

No. 10027. दशावतारस्तोत्रम्.
DAŚĀVATĀRASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 226*a* of the MS. described under No. 9001.

Complete.

Similar to the above.

Beginning :

चित्ते मम स्फुरति चिन्तितकल्पशाखी
विष्णोर्विलासललितः प्रथमावतारः ।
लक्ष्मीकटाक्षवलनस्य च यस्य चासी-
त्संचारकेलिषु समो गुरुशिष्यभावः ॥ १ ॥
कृत्स्नं जगन्निजकिशोरकनिर्विशेषं
संरक्षितुं सकृदनुस्मृतिमात्रकेण ।

स्वच्छन्दकन्दलितकच्छपराजवेषः
भूतिं तरङ्गयतु मे पुरुषः पुराणः ॥ २ ॥

End:

कल्की करिष्यति कठोरभुजप्रतापः
पाषण्डशून्यमखिलं क्षितिमण्डलं यः ।
धन्याय विष्णुयशसस्तनयाय तस्मै
नित्यं नमोऽस्तु निगमस्थितिकारणाय ॥ १० ॥
प्रातर्निवेद्य पदयोः परमस्य पुंसः
पद्यान्यमूनि दश पापहराणि सद्यः ।
भोगानवाप्य पुरुषो भगवत्प्रसादा-
त्प्राप्नोति तद्भगवतः परमं पदं सः ॥ ११ ॥

Colophon:

इति दशावतारस्तु(ति)ः संपूर्णा ॥

No. 10028. दशावतारस्तोत्रम्.

DAŚĀVATĀRASTŌTRAM.

Page, 1. Lines, 20 on a page.

Begins on fol. 28*b* of the MS. described under No. 2043.

Breaks off in the seventh stanza.

Similar to the above.

Beginning:

येनेदं जगदखिलं धृतं विधात्रा विश्वं यज्जठरगतं युगान्तकाले।
यो वेदानवति समेत्य मत्स्यरूपस्तं देवं शरणमहं गतोऽस्म्यनन्तम् ॥

End:

यः क्षत्रं निशितपरश्वधेन सर्वं
जित्वा तत्क्षत(ज)जलेन कर्म पित्र्यम् ।
चक्रे विक्रमविभवैकसंपदीशः
तं देवं शरणमहं गतोऽस्म्यनन्तम् ॥ ६ ॥

यो लोकत्रयवनवह्निमीश्व[र:सु] राणा-
मीशानो दशवदनं रणे निहन्तुम् ।

No. 10029. दाशरथिशतकम्.

DĀŚARATHIŚATAKAM.

Substance, palm-leaf. Size, 17¾ × 1⅛ inches. Pages, 12. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

The first eight stanzas are in Sanskrit; and the rest are in Telugu. Breaks off in the 38th stanza.

It is stated on the cover leaf that the MS. belonged to one Gōpālan.

A hundred stanzas in praise of God Rāma, worshipped at Bhadrācala in the Kistna district, well-known as the place of worship of the Vaiṣṇava devotee Rāmadāsa.

Beginning:

श्रीरघुराम चारुतुलसीदलदाम शमक्षमादिशृङ्गारगुणाभिराम त्रिजग-
न्नुतशौर्यरमाललाल(म) दुर्वारकबन्धराक्षसविराम जगज्जनकल्मषार्णवोत्तारक-
नाम भद्रगिरिदाशरथे करुणापयोनिधे ॥ १ ॥

End:

कनकविशालचेल भवकाननशातकुठारधार
सज्जनितपराक्रमक्रमपरिपालशीलदिविजस्तुत ।
षड्गुणकाण्डकाण्डसंजनितपराक्रमक्रमाविशारदळ-

[पयोनिधे ॥
(सु)न्दरविन्द(रवीन्दु)कुन्दचन्दनघनसार भद्रगिरिदाशरथे करुणा-

No. 10030. दिव्यदेशमङ्गलाशासनपञ्चकम्.

DIVYADEŚAMAṄGALĀŚĀSANAPAÑCAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 12b of the MS. described under No. 9702.
Complete.

Five stanzas in praise of the four great Vaiṣṇava shrines of Southern India, viz., Śrīraṅgam, Tirupati, Conjeeveram and Tirunārāyaṇapuram (Melkote).

Beginning:

विधिविहितसपर्यां वीतदोषानुषङ्गा
मुपचितधनधान्यामुत्सवैश्वा(का)नुषङ्गाम् ।
स्वयमुपचिनु नित्यं रङ्गधामन् सुरक्षां
शमितविमतपक्षां शाश्वती रङ्गलक्ष्मीम् ॥

End:

श्रीरङ्गमङ्गलमणिं करुणानिवासं
श्रीवेङ्कटाद्रिशिखरालयकालमेघम् ।
श्रीहस्तिशैलशिखरोज्ज्वलपारिजातं
श्रीशं नमामि शिरसा यदुशैलदीपम् ॥

No. 10031. दिव्यदेशमङ्गलाशासनपञ्चकम्.

DIVYADEŚAMAṄGALĀŚĀSANAPAÑCAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 38a of the MS. described under No. 8850.

Complete.

Same work as the above, but with a different end as given below:—

श्रीरङ्गहिरदहृयाद्रिपूर्वकेषु स्थानेषु स्थिरविभवा भ(वत्सपर्या) ।
(आकल्पं वर) द विधूतवैरिपक्षा भूयः स्याद्भवदनुकम्पयैव भूयात् ॥
कवितार्किक . . . . . वेदान्तगुरवे नमः ॥

No. 10032. दिव्यदेशमङ्गलाशासनपञ्चकम्.

DIVYADEŚAMAṄGALĀŚĀSANAPAÑCAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 9782.

Complete.

Same work as the above.

No. 10033. देवनायकपञ्चाशत्.

DĒVANĀYAKAPAÑCĀŚAT.

Pages, 10. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 8904.

Complete.

Fifty stanzas in praise of God Viṣṇu, worshipped as Dēvanāyaka at Tiruvahīndrapuram, near Cuddalore in the South Arcot district: by Vēdāntadēśika.

Beginning:

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

प्रणतसुरकिरीटप्रान्तमन्दारमालाविगलितमकरन्दस्निग्धपादारविन्दः ।
पशुपतिविधिपूज्यः पद्मपत्रायताक्षः फणिपतिपुरनाथः पातु मां देवनाथः॥

देवाधिनाथकमलापृतनेशपूर्वां दीतान्तरां वकुलभूषणनाथमुख्यैः ।
रामानुजप्रमुखैभिः परिभूषिताग्रां गोप्त्रीं जगन्ति गुरुपङ्क्तिमहं प्रपद्ये ॥

End:

निरवधिगुणजातं नित्यनिर्दोषमाद्यं
नरकमथनदक्षं नाकिनामेकनाथम् ।
विनय(त)विषयसत्यं वेङ्कटेशः कविस्त्वां
स्तुतिपदमधिगच्छन् शोभते सत्यवादी ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु देवनायकपञ्चाशत्संपूर्णा ॥

कवितार्किकसिंहाय . . . वेदान्तगुरवे नमः ॥

No. **10034.** देवनायकपञ्चाशत्.

DĒVANĀYAKAPAÑCĀŚAT.

Pages, 16. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 8898.

Complete.

Same work as the above.

No. **10035.** देवनायकपञ्चाशत्.

DĒVANĀYAKAPAÑCĀŚAT.

Pages, 8. Lines, 7 on a page.

Begins on fol. 91*b* of the MS. described under No. 9706.

Complete.

Same work as the above.

No. **10036.** देवनायकपञ्चाशत्.

DĒVANĀYAKAPAÑCĀŚAT.

Pages, 15. Lines, 6 on a page.

Begins on fol. 90*a* of the MS described under No. 9388.

Wants the first stanza ; otherwise complete.

Same work as the above.

No. **10037.** देवनायकपञ्चाशत्.

DĒVANĀYAKAPAÑCĀŚAT.

Pages, 9. Lines, 7 on a page.

Begins on fol. 250*a* of the MS. described under No. 9001.

Wants the first stanza ; and breaks off in the 44th stanza.

Same work as the above.

No. **10038.** देवनायकपञ्चाशत्.

DĒVANĀYAKAPAÑCĀŚAT.

Pages, 8. Lines, 7 on a page.

Begins on fol. 292*a* of the MS. described under No. 9001.

Wants the first stanza ; otherwise complete.

Same work as the above.

No. 10039. देवराजप्रपत्तिः.
DĒVARĀJAPRAPATTIḤ.

Pages, 2. Lines, 17 on a page.

Begins on fol. 30*b* of the MS. described under No. 2043.

Complete in thirteen stanzas expressing the self-surrender of the author to God Varadarāja worshipped at Conjeeveram.

Beginning :

लक्ष्मीकपोलतलकल्पितपत्ररेखाकस्तूरिकासुरभिसुस्मितवक्त्रचन्द्र ।
श्रीहस्तिभूमिधरभूषण तावकीनौ श्रीदेवराज चरणौ शरणं प्रपद्ये ॥ १॥
सर्वाभिवाञ्छितसमस्तवरप्रदानविख्यातिमद्वरदराजमहाभिधान ।
सर्वाङ्गसुन्दर विमृग्यसमाधिकार्थ श्रीदेवराज चरणौ शरणं प्रपद्ये ॥ २ ।

End :

सत्त्वोत्तरैः सततसेव्यपदाम्बुजेन
संसारतारकदयार्द्रदृगञ्चलेन ।
सौम्योपयन्तृमुनिना मम दर्शितौ ते
श्रीदेवराज चरणौ शरणं प्रपद्ये ॥ ११ ॥

* * * *

प्रत्यग्रकल्पतरुपल्लवतल्लजाभावग्रध्वजाभिमुखमङ्गलचिह्नगर्भौ ।
ब्रह्मादिदेवमणिमौलिमहार्हपीठौ भूयस्त्वदीयचरणौ शरणं प्रपद्ये ॥१३॥

Colophon :

इति देवराजप्रपत्तिः संपूर्णा ॥

No. 10040. देवराजप्रपत्तिः.
DĒVARĀJAPRAPATTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 196*b* of the MS. described under No. 9001.

Wants the last stanza.

Same work as the above.

No. 10041. देवराजप्रपत्तिः.
DĒVARĀJAPRAPATTIḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 46*a* of the MS described under No. 9718.

Wants the last stanza.

Same work as the above.

No. 10042. देवराजप्रपत्तिः.
DĒVARĀJAPRAPATTIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 31*b* of the MS. described under No. 9745.

Wants the last stanza.

Same work as the above.

No. 10043. देवराजमङ्गलाशासनम्.
DĒVARĀJAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 46*b* of the MS. described under No. 9718.

Complete.

Stanzas expressing benediction on God Varadarāja.

Beginning:

अस्तु श्रीस्तनकस्तूरीवासनावासितोरसे ।
श्रीहस्तिगिरिनाथाय जगन्नाथाय मङ्गलम् ॥ १ ॥
वाजिमेधे वपाहोमे धातुरुत्तरवेदितः ।
उदिताय हुतादग्नेरुदाराङ्गाय मङ्गलम् ॥ २ ॥
यजमानं विधिं वीक्ष्य स्मयमानमुखश्रिये ।
दयमानदृशे तस्मै देवराजाय मङ्गलम् ॥ ३ ॥

End:

श्रीकाञ्चीपूर्णमिश्रेण स्मितपूर्वाभिभाषिणे ।
अतीतार्चाव्यवस्थाय हस्त्यद्रीशाय मङ्गलम् ॥ ११ ॥

* * *

रामानुजार्यदिव्याज्ञा वर्धतामभिवर्धताम् ॥

No. 10044. देवराजमङ्गलाशासनम्.
DĒVARĀJAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 8 on a page.
Begins on fol. 16*b* of the MS. described under No 9651.
Complete.
Same work as the above, but without the extra stanzas found at the end in the MS. described under the last number.

No. 10045. देवराजमङ्गलाशासनम्.
DĒVARĀJAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 7 on a page.
Begins on fol. 32*a* of the MS. described under No. 9745.
Complete.
Same work as the above; with a colophon as given below:—
श्रीवरदराजमङ्गलाशासनं सपूर्णम् ॥

No. 10046. देवराजमङ्गलाशासनम्.
DĒVARĀJAMAṄGALĀŚĀSANAM.

Pages, 4. Lines, 6 on a page.
Begins on fol. 16*a* of the MS. described under No. 9655.
Complete.
Same work as the above.

No. 10047. देवराजसुप्रभातम्.
DĒVARĀJASUPRABHĀTAM.

Pages, 4. Lines, 6 on a page.
Begins on fol. 16*a* of the MS. described under No. 9704.
Complete.
Eight stanzas preying to God Varadarāja for a good morning.

Beginning:

इह जगति मनीषाभूषणानां प्रजानामहमहमिकया ये हर्षदानाय वेषाः।
तदनुगुणतनूनां तचादिष्टार्थसिद्धिं दिशतु वरदराजो देवराट् सुप्रभातम्॥ १॥

End:

इति विरचितमेतत्सुप्रभाताष्टकाथाः (कं यः)
पठति सततमादौ प्रातरुत्थाय धीरः ।
तदभिलषितसिद्धं दातुमेवात्मपाणौ
दद(ध)ति वरदमुद्रां देवराजः समिन्धे ॥ ८ ॥

No. 10048. देवराजसुप्रभातम्.
DĒVARĀJASUPRABHĀTAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 31*a* of the MS. described under No. 9745.

Complete.

Same work as the above, but with a colophon as given below :—

वरदराजसुप्रभाताष्टकं संपूर्णम् ॥

No. 10049. देव्रराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Pages, 2. Lines, 24 on a page.

Begins on fol. 95*a* of the MS. described under No. 5959.

Complete.

Same work as that described under R. No. 174(*j*) of the Triennial Catalogue of MSS., Vol. I, Part I-A. This is also called Varadarājāṣṭaka.

No. 10050. देवराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 9012.

Complete.

Same work as the above.

No. 10051. देवराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 9661.

Complete.

Same work as the above.

No. **10052.** देवराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 26*b* of the MS. described under No. 9652 and not on fol. 27*b* as stated therein.

Complete.

Same work as the above, with a colophon :

वरदराजाष्टकं संपूर्णम् ॥

No. **10053.** देवराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 31*a* of the MS. described under No. 9660

Complete.

Some work as the above.

No. **10054.** देवराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 18*b* of the MS. described under No. 9008.

Complete.

Same work as the above.

No. **10055.** देवराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Pages, 2. Lines, 14 on a page.

Begins on fol. 15*a* of the MS described under No. 3877.

Complete.

Same work as the above.

No. 10056. देवराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 225*a* of the MS. described under No. 9001.

Complete.

Same work as the above, but without the first two introductory stanzas and with a different colophon as given below:—

वरदराजाष्टकं संपूर्णम् ॥

No. 10057. देवराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described under No. 9534.

Complete.

Same work as the above; but without a colophon.

No. 10058. देवराजाष्टकम्.
DĒVARĀJĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 2*b* of the MS. described under No. 8900, wherein this work has been omitted to be mentioned in the list of other works given therein.

Almost complete.

Same work as the above.

No. 10059. देहलीशस्तुतिः.
DĒHALĪŚASTUTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 285*b* of the MS. described under No. 9001.

Complete.

In praise of God Viṣṇu worshipped under the names of Dēhalīśa and Trivikrama at Tirukkoyilur in the South Arcot district: by Vēdāntadēśika.

Beginning:

विक्रम्य येन विजितानि जगन्ति भूम्ना विश्वस्य यं परमकारणमामनन्ति ।
विश्राणयन्प्रणयिनां विविधान्पुमर्थान् गोप्ता स मे भवतु गोपपुराधिराजः॥ १॥
देहल्यधीश्वर तवेदृशमीश्वरत्वं तुष्टूषतो दिशति गद्गदिकानुबन्धम ।
वाचालयस्यथ च मां क्वचन क्षपायां क्षान्तेन दान्तकविमुख्यविमर्दनेन॥ २॥

End:

इयमवितथवर्णा वर्णनीयस्वभावाद्विदितनिगमसीम्ना वेङ्कटेशेन गीता ।
भवमरुभुवि तृष्णालोभपर्याकुलानां दिशतु फलमभीष्टं देहलीशस्तुतिर्वः॥ २८॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु देहलीशस्तुतिः संपूर्णा ॥

No. 10060. देहलीशस्तुतिः.
DEHALĪŚASTUTIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 247*a* of the MS. described under No. 9001.

Complete.

Same work as the above.

No. 10061. देहलीशस्तुतिः.
DEHALĪŚASTUTIḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 23*a* of the MS. described under No. 3546.

Complete.

Same work as the above.

No. 10062. दैन्याष्टकम्.
DAINYĀṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 75*b*. of the MS. described under No. 2981.

Complete.

Eight stanzas invoking the grace and mercy of Lord Kṛṣṇa to the supplicant : by Haridāsa.

Beginning :

श्रीकृष्ण गोकुलाधीश नन्दगोपतनूद्भव ।
यशोदागर्भसंभूत मयि दीने कृपां कुरु ॥ १ ॥

End :

स्वाचार्यहृदयस्थायिलीलाशतयुत प्रभो ।
सर्वथा शरणं याते मयि दीने कृपां कुरु ॥ ८ ॥

Colophon :

इति श्रीहरिदासोक्तं दैन्याष्टकं संपूर्णम् ॥

No 10063. द्वादशमञ्जरिकास्तोत्रम्.
DVĀDAŚAMAÑJARIKĀSTŌTRAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 31*b* of the MS. described under No. 2571.

Twelve stanzas in praise of Gōvinda and emphasising the need for devoting oneself to the worship of Gōvinda or Viṣṇu. There are eleven more stanzas added at the end in the same strain. The work is attributed to the author ship of Śaṅkarācarya.

Beginning :

भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते ।
संप्राप्ते संनिहिते काले नहि नहि रक्षति डुकृञ्करणे ॥
दिनमपि रजनी सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशापाशः ॥
भज गोविन्दं—

End :

द्वादशमञ्जरिकाभ(भि)रेष विशेषोऽशेषाणां कथितोऽस्त्युपदेशः ।
एषां ते न करोति विवेकस्तते पच्यन्ते नरकमनेकः ॥

* * * *

यावत्पवनो निवसति गे(दे)हे सर्वे पृच्छति पतिरिति गेहे ।
गतमिति वायुर्मरणोपाये भार्या बिभ्यति तस्मिन्काये ॥
भज गोविन्दं—

No. **10064.** द्वादशमञ्जरिकास्तोत्रम्.

DVĀDAŚAMAÑJARIKĀSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins of fol. 3*b* of the MS. described under No. 9869.

Incomplete.

Same work as the above, but the stanzas are arranged in a different order.

No. **10065.** द्वादशमञ्जरिकास्तोत्रम्.

DVĀDAŚAMAÑJARIKĀSTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 9869.

Incomplete.

Same work as the above, but the stanzas are arranged in a different order.

No. **10066.** द्वादशमञ्जरिकास्तोत्रम्.

DVĀDAŚAMAÑJARIKĀSTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 9729.

Complete.

Same work as the above, but the stanzas are arranged in a different order.

No. **10067.** द्वादशमञ्जरिकाविवरणम्.

DVĀDAŚAMAÑJARIKĀVIVARAṆAM.

Pages, 95. Lines, 5 on a page.

Begins on fol. 114*a* of the MS. described under No. 2392.

Complete.

A commentary on the work described under the last number: by Svayamprakāśa, a disciple of Gōpaālyōgindra.

Beginning:

यत्पादस्मरणं समस्तजगतां सर्वार्थसिद्धिप्रदं
यन्नामश्रवणं विशुद्धमनसां ज्ञानप्रदं योगिनाम् ।
यत्कारुण्यकटाक्षवीक्षणमहो संसारसंतारणं
तं विश्वेशमनन्तमाद्यममलं श्रीस्वप्रकाशं भजे ॥
सर्वाधारमनाधारं सर्गस्थित्यन्तकारिणम् ।
सर्वज्ञं करुणामूर्तिं श्रीरामं शरणं भजे ॥
यत्प्रसादादहं साक्षादीश्वराणामपीश्वरः ।
श्रीमद्गोपालयोगीन्द्रांस्तान्वन्दे करुणानिधीन् ॥
आचार्यकृतिसंबन्धान्मद्वाक्यं श्लाघ्यमेव हि ।
रथ्योदकं यथा गङ्गाप्रवाहपतनाच्छुभम् ॥

* * * *

भगवान् सर्वज्ञः शंकराचार्यरूपेणावतीर्य प्रथमं ज्ञानसाधनवैराग्यमुपदिशन् परमकारुणिकत्वेन पितेव स्वतनयं बहिःप्राणचित्तं शिष्यं[सं] संबोधयति—मूढ जहीहीति—

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ १ ॥

मूढ विवेकशून्य धनागमतृष्णां जहि परित्यज । हि यतः सर्वानर्थमूलं वित्तमिति न स्फुरति वा ।

End:

सर्वविद्यानामात्मलाभात्त परं विद्यत इति च ।

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ इति ।

श्रवणमननकालं ध्यानमेकान्तवासं विमलसुखमहाब्धौ मग्नचित्तोऽनुजाने
मुनिगण इव दृष्टे दण्डकारण्यचारे त्वयि करधृतचापे जानकीप्राणनाथे ॥

हृत्पद्मान्तररत्नपीठकमले वीरासनस्थापितुं(तं)
वीक्षन्तं कृपया प्रसन्नवदनं विज्ञानमुद्रान्वितम् ।
वामे जानुनि सक्तवामसुभुजं म(व)न्दारुकल्पद्रुमं
श्रीमद्देशिकमूलविग्रहमहं सीतापतिं भावये ॥

Colophon:

इति स्वयंप्रकाशस्वामिविरचितद्वादशमञ्जरिकाविवरणं समाप्तम् ॥

No. 10068. द्वादशस्तोत्रम्.
DVĀDAŚASTŌTRAM.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 19. Lines, 5 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 15*a*. The other works herein are Pārijātaharaṇa 1*a*, Pramēyamālika 24*a*.

Complete.

Same work as that described under R. No. 445 of the Triennial Catalogue of MSS., Vol. I, Part I-B.

Twelve Adhyāyas, each containing 12 stanzas of praise and prayer addressed to God Viṣṇu and his incarnations: by Ānandatīrtha.

Beginning:

वन्दे वन्द्यं सदानन्दं वासुदेवं निरञ्जनम् ।
इन्दिरापतिमाद्यादिवरदेशं वरप्रदम् ॥
नमामि निखिलाधीशकिरीटाग्रेषु(जुष्ट)पीठवत् ।
हृत्तमःशमनेऽर्कामं श्रीपतेः पादपङ्कजम् ॥

End:

आनन्दचन्द्रिकास्यन्दक वन्दे आनन्दतीर्थ परानन्द वरप्रद ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्द्वादशस्तोत्रे द्वादशोऽध्यायः ॥

No. **10069.** द्वादशस्तोत्रम्.
DVĀDAŚASTŌTRAM.

Pages, 29. Lines, 5 on a page.

Begins on fol. 57*a* of the MS. described under No. 1872.

Complete.

Same work as the above.

No. **10070.** द्वादशस्तोत्रम्.
DVĀDAŚASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 206*a* of the MS. described under No. 4783, wherein the work has been omitted to be mentioned in the list of other works given therien.

Contains the first two Adhyāyas only.

Same work as the above.

No. **10071.** द्वादशस्तोत्रम्.
DVĀDAŚASTŌTRAM.

Pages, 31. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 9811.

Wants seven stanzas in the beginning; otherwise complete.

Same work as the above.

No. **10072.** द्वादशस्तोत्रव्याख्यानम्.
DVĀDAŚASTŌTRAVYĀKHYĀNAM.

Pages, 44. Lines, 6 on a page.

Begins on fol. 208*a* of the MS. described under No. 4783, wherein this work has been mentioned as Dvādaśanāmastōtra in the list of other works given therein.

Complete.

A commentary on the work described under the last number.

Beginning:

वन्दे निरन्तरानन्दं निर्दोषं कृष्णमञ्जसा ।
द्वादशस्तोत्रविवृतिं नत्वा कुर्वे हरेर्मुदे ॥

हरेर्मङ्गलमाचरति—वन्द्यमिति। वन्द्यं वन्दितु (योग्यं सदानन्दं) सदा आनन्दो यस्य सः सदानन्दः तं सदानन्दं नित्यानन्दमिति यावत्। निर्गतः अञ्जनः यस्य सः निरञ्जनः तं निरञ्जनं निर्दोषम्। इन्दिराया लक्ष्म्याः पतिः इन्दिरापतिः तमिन्दिरापतिं लक्ष्मीस्वामिनम्।

End:

परमानन्दरूपा चन्द्रिका तस्याः स्यन्दकः . . . . . . समर्पक कृष्ण त्वां वन्दे॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते(त)द्वादशस्तोत्रटीकायां द्वादशोऽध्यायः॥

No. 10073. द्विश्लोकी.
DVIŚLOKĪ.

Page, 1. Lines, 7 on a page.

Begins on fol. 546 of the MS. described under No. 9012. Complete.

Two stanzas in praise of Nārāyaṇa.

Beginning and End:

यद्भक्तिप्रचयात्मके दिनमुखे दृष्टिक्षमः क्षेत्रिणः
क्षिप्रं ससुत(संसृति)शर्वरीं क्षिपति यत्संकल्पसूर्योदयः।
तत्रै(त्त्वै)रत्नविभूषणैरधिगतस्वाधीननित्योन्नतिः
श्रीमानस्तु स मे समस्तविपदुत्ताराय नारायणः॥

अध्यासीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासना-
दाचार्यादिह देवतां समधिकामन्यां न मन्यामहे।
यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकां
मग्नानां भविनां भवार्णवसमुत्ताराय नारायणः॥

No. 10074. ध्रुवस्तोत्रम्.
DHRUVASTŌTRAM.

Pages, 4. Lines, 14 on a page.

Begins on fol. 19*a* of the MS. described under No. 3877.

Complete.

This hymn of praise, said to have been addressed by Dhruva to Nārāyaṇa when he appeared before him, is taken from the Viṣṇu-Purāṇa, Aṁśa I, Adhyāya 12.

Beginning:

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
भूतादिरादिप्रकृतिर्यस्य रूपं नतोऽस्म्यहम् ॥
शुद्धः सूक्ष्मोऽखिलस्यापि प्रधानात्परतः पुमान् ।
यस्य रूपं नमस्तस्मै पुरुषायाविनाशिने ॥

End:

यः स्थूलसूक्ष्मः प्रकटाप्रकाशो यः सर्वभूतो न च सर्वभूतः ।
विश्वं यतश्चैतदविश्वहेतुः नमोऽस्तु तस्मै पुरुषोत्तमाय ॥

श्रीपराशरः—

तस्य तच्चेतनो देवः स्तुतिमित्थं प्रकुर्वतः ।
आविर्बभूव भगवान् पीताम्बरधरो हरिः ॥

No. 10075. नन्दसून्वष्टकम्.
NANDASŪNVAṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 97*a* of the MS. described under No. 2981.

Complete.

Herein Lord Kṛṣṇa, son of Nandagōpa, is conceived in various ways and extolled. By Śrīmadācārya or Vallabhācarya.

Beginning:

सदा गोपिकामण्डले राजमानं लसन्नृत्यवृन्दादिलीलानिदानम् ।
गलद्दर्पकन्दर्पशोभानिधानं भजे नन्दसूनुं सदानन्दरूपम् ॥ १ ॥

End:

धृतग्रीवगोवर्धनाधारहस्तं परित्रातगागोपगोपीसमस्तम् ।
सुराधीशशर्वादिदेवप्रशस्तं भजे नन्दसूनुं सदानन्दरूपम् ॥ ८ ॥

Colophon:

इति श्रीमदाचार्यविरचितं नन्दसून्वष्टकं संपूर्णम् ॥

No. 10076. नरसिंहप्रातःस्मरणपञ्चकम्.

NARASIṀHAPRĀTASSMARAṆAPAÑCAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 39*b* of the MS. described under No. 5953, and not on fol. 39*a* as stated therein.

Complete.

Five stanzas of praise addressed to the man-lion incarnation of Viṣṇu and intended to be repeated in the morning. He is considered to be able to remove disease, fright and affliction.

Beginning:

प्रातः स्मरामि नरसिंहमुखारविन्दं पूर्णेन्दुबिम्बविलसत्त्व(त्व)मलं त्रिनेत्रम् ।
कोटिप्रभं रविकिरीटसुचारुगण्डं मन्दस्मितं मकरकुण्डलमञ्जुवाचम् ॥ १ ॥
प्रातः स्मरामि नरसिंहकरारविन्दं विभ्रत्पिनाकमभयं हि सुशङ्खपाशम् ।
चक्राङ्गदादि कटकं स्वसुरेन्द्रवैरिं भक्तप्रियं त्वतिविलासमहो विचित्रम् ॥२॥

End:

अहो वीर्यमहो शौर्यमहो बाहुपराक्रमः ।
नारसिंहं परं दैवमहो बलमहो बलम् ॥
आधिव्याधिमहाभीतिमहादुःखनिवारणम् ।
अपारकरुणासिद्धो(न्धो) दिव्यसिंह नमोऽस्तु ते ॥

No. 10077. नरसिंहस्तुतिः—सव्याख्या.

NARASIṀHASTUTIḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅜ × 1½ inches. Pages, 31. Lines, 6 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Complete.

Similar to the above. The portion of the last leaf in the MS. giving the name of the author is torn. It is however known from the introductory stanzas that the author of the text is Trivikramācārya and that of the commentary Nārāyaṇa.

Beginning:

अ(था)स्त्यजेशादिनुताङ्घ्रिपङ्कजः श्रीनारसिंहः सकलेष्टदः सताम् ।
व्रजन्ति यस्य स्मृतिमात्रतो ऽल्य भियं दधाना हृदयेषु शत्रवः ॥
श्रीमद्धनूमज्जयभीमसद्गुरो श्रीमध्व पूर्णप्रमते सतां गते ।
प्रदेहि मे शुद्धधियं सदानयं त्वां स्वस्तये वायुमुपब्रवामहे ॥
कवीन्द्रविन्दूरस(वृन्दारक)मौलिरत्नत्रिविक्रमाचार्यमुखारविन्दजाम् ।
स्तुतिं नृसिंहस्य यथामनीषितं नारायणो व्याकुरुते हि लेशतः ॥

* * * *

सा मन्त्ररूपा सततं गोप्या भक्तेष्टकामधुक् ।
सर्वारिष्टप्रशमनी भक्त्या व्याक्रियते मया ॥

प्रलयेति । हे नृसिंह मे मदीयम् असह्यं वीर्यं यस्येत्येतादृशमहितमनिष्टं दह दह ।

End:

लिकुचेति । लिकुचः कुलनामैतत् । तत्कुलोत्पन्नेषु तिलकः श्रेष्ठः स्वजनकः तत्सूनुः । सतां हितरूपो योऽर्थः तमनुसरते तथाविधः ।

* * * *

प्रमादादागतस्थापनात् ।

Colophon:

इति श्रीमद्विद्वन्मकुटविश्वना . . . मत्पदवाक्यप्रमाणाब्धिपारावारैकमग्नमहाकविकोटिरविकोटि . . . . . ता श्रीनरसिंहस्तुतिः समाप्ता ॥

No. 10078. नरसिंहस्तोत्रम्.

NARASIṀHASTŌTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 4a of the MS. described under No. 9850.

Complete.

Same work as the one described under R. No. 324(e) of the Triennial Catalogue of MSS., Vol. I, Part I-A.

No. 10079. नरसिंहाष्टकम्.
NARASIṀHĀṢṬAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 85*b* of the MS. described under No. 9706.

Complete.

Similar to the above: and consists of eight stanzas. The stanza given as end below explains the efficacy of a repetition of this Stōtra.

Beginning:

श्रीमान् वेङ्कट . . . . सदा हृदि ॥

श्रीमदकलङ्कपरिपूर्णशशिकोटिश्रीधरमनोहरसटापटलकान्त ।
पालय कृपालय भवाम्बुधिनिमग्नं मामसुरकाल नरसिंह ॥ १ ॥

End:

अष्टकमिदं सकलपातकभयघ्नं कामदमशेषदुरितामयरिपुघ्नम् ।
यः पठति संततमशेषविभवं ते गच्छति पदं च नरसिंह नरसिंह ॥

कवितार्किक . . . . गुरवे नमः ॥

No. 10080. नरसिंहाष्टकम्
NARASIṀHĀṢṬAKAM

Substance, palm-leaf. Size, 15½ × 1⅝ inches. Pages, 3. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 57*b*. The other work herein is Bhāgavatamu (Telugu) 1*a*.

Complete.

Similar to the above.

Beginning:

कुन्देन्दुं शङ्खवर्णं कृतयुगभगवान् पद्मपुष्पाविधातुं
त्रेतायां काञ्चनाभः पुनरपि समये द्वापरे रक्तवर्णः ।
शम्भुः संप्राप्तिकाले कलियुगसमये नीलमेघाम्बुनाभः
प्रद्योतः सृष्टिकर्ता परबलमथनः पातु मां नारसिंहः ॥

End :

अहो वीर्यमहो शौर्यमहो बाहुपराक्रमः ।
नारसिंहः परं दैवमहो बलमहो बलम् ॥

No. 10081. नवनीतप्रियाष्टकम्.
NAVANĪTAPRIYĀṢṬAKAM.

Pages, 2. Lines, 28 on a page.

Begins on fol. 84a of the MS. described under No. 2981.

Complete.

Eight stanzas in praise of Lord Kṛṣṇa conceived as having in his hand Navanīta, i.e., fresh butter, for which he is considered to have a great liking : by Haridāsa.

Beginning :

अलिकावृतलसदलके विरचितकस्तूरिकातिलके ।
चपलयशोदाबाले विरचितमाले मतिर्मेऽस्तु ॥ १ ॥
मुखरितनूपुरचरणे कटिबद्धक्षुद्रघण्टिकावरणे ।
द्वीपिकरजकृतभूषाभूषितहृदये मतिर्मेऽस्तु ॥ २ ॥
करधृतनवनवनीते हुंकृतजननीविभीषिकाभीते ।
रतिमुद्वहताचेतो गोपीभिर्वश्यता नीते ॥ ३ ॥

End :

कामादपि कमनीये नमनीये ब्रह्मरुद्राद्यैः ।
निस्साधनभजनीये भावतनौ (सर्वदा) मतिर्मेऽस्तु ॥ ८ ॥

Colophon :

इति श्रीहरिदासविरचितं नवनीतप्रियाष्टकं संपूर्णम् ॥

No. 10082. नामत्रयध्यानश्लोकाः—कर्णाटकटीकासहिताः.
NĀMATRAYADHYĀNAŚLOKĀḤ WITH KANARESE COMMENTARY.

Pages, 5. Lines, 5 on a page.

Begins on fol. 68a of the MS. described under No. 59:2.

Complete.

The first page contains the text and the remaining pages the Kanarese commentary.

A number of stanzas in praise of Viṣṇu and intended to be recited as stanzas of meditation just before a formal repetition of the Mantra called Nāmatraya (*vide* No. 6471 of the Descriptive Catalogue of Sanskrit MSS.).

Beginning:

शङ्खचक्रधरं देवं चतुर्बाहुं किरीटिनम् ।
पीताम्बरधरं श्यामं सर्वाभरणसंयुतम् ॥
सर्वायुधैरुपेतं तं गरुडोपरि संस्थितम् ।
सनकादिमुनीन्द्रैस्तु सर्वदेवैरुपासितम् ॥

End:

सर्वलोकस्य रक्षार्थमटन्तं हरिमव्ययम् ।
अभयं वरदं चैव प्रयच्छन्तं मुदान्वितम् ॥
एवं ध्यात्वा जपेन्नित्यं परब्रह्मस्वरूपिणम् ॥

No. 10083. नामामृतरसोदयः.
NĀMĀMṚTARASŌDAYAḤ.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 234. Lines, 10 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Complete.

Same work as the one described under R. No. 42 of the Triennial Catalogue of MSS., Vol. I, Part I-A.

No. 10084. नारायणविंशतिः.
NĀRĀYAṆAVIṀŚATIḤ.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 3. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 40*a*. The other work herein is Varadābhyudaya I*a*.

Complete.

Twenty stanzas in praise of Nārāyaṇa by Veṅkaṭanarasiṁha, son of Śrīnivāsa of Śailla family.

Beginning:

श्रीमान्भूमौ यदुगिरितटे पालयन्सत्कदम्बं
दीव्यत्कालाम्बुदनिभतनुः शङ्खचक्रादिपाणिः ।
पद्मागारादिमसुरकिरीटालिनीराजिताङ्घ्री
रेजे पीताम्बरविलसितः पुण्डरीकायताक्षः ॥ १ ॥
नारायण पादौ तव सेवे हि सदाहं
घोरामयवृन्दाम्बुधिकुम्भोद्भवडिम्भौ ।
वन्दारुकवृन्दामितसंदायिसुरद्रु
मन्दीकृतपङ्केरुहवृन्दातुलगर्वौ ॥ २ ॥

End:

श्रीमन्नारायणस्तोत्रं कृतं तद्गतचेतसा ।
श्रीवेङ्कटनृसिंहेन शठारातिकुलोद्भवा ॥ १२ ॥
प्रातरुत्थाय यो भक्त्या स्तोत्रं पठति भव्यदम् ।
सर्वान्कामान् स लब्ध्वैतदवाप्नोति परं पदम् ॥

Colophon:

श्रीशैलवंशरत्नश्रीनिवासार्यतनुजेन वेङ्कटनरसिंहेन कृता नारायणविंशतिः संपूर्णा ॥

No. 10085. नारायणीयम्.
NĀRĀYAṆĪYAM.

Substance, Śrītāla. Size, $8\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 202. Lines, 12 on a page. Character, Malayālam. Condition, good. Appearance, new

Complete.

The author of the work is Nārāyaṇa. According to local tradition he is said to have been cured of rheumatism by composing this work. The first MS. seems to have been written by his brother Mātṛdatta.

This work consists of more than one thousand stanzas divided into twelve Paricchēdas and is in praise of Nārāyaṇa worshipped in the form of Kṛṣṇa at Gurupavanapura (now called Guruvāyūr) in Malabar. The work incidentally describes the episodes of the Bhāgavata-Purāṇa.

Beginning :

सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां
निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम् ।
अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्मतत्त्वं
तत्तावद्भाति साक्षाद्गुरुपवनपुरे हन्त भाग्यं जनानाम् ॥ १ ॥
एवं दुर्लभ्यवस्तुन्यपि सुलभतया हस्तलब्धे यदन्य-
त्तन्वा वाचा धिया वा भजति बत जनः क्षुद्रतैव स्फुटेयम् ।
एते तावद्वयं तु स्थिरतरमनसा विश्वपीडापहत्यै
निःशेषात्मानमेनं गुरुपवनपुराधीशमेवाश्रयामः ॥ २ ॥

End :

योगीन्द्राणां त्वदङ्गेष्वधिकसुमधुरं मुक्तिभाजां निवासो
भक्तानां कामवर्षद्युतरुकिसलयं नाथ ते पादमूलम् ।
नित्यं चित्तस्थितं मे पवनपुरपते कृष्ण कारुण्यसिन्धो
हृत्वा निःशेषतापान्प्रदिशतु परमानन्दसंदोहलक्ष्मीम् ॥
अज्ञात्वा ते महत्त्वं यदिह निगदितं विश्वनाथ क्षमेथाः
स्तोत्रं चैतत्सहस्रोत्तरमधिकतरं त्वत्प्रसादाय भूयात् ।
द्वेधा नारायणीयं श्रुतिषु च जनुषा स्तुत्यतावर्णनेन
स्फीतं लीलावतारैरिदमिह कुरुतामायुरारोग्यसौख्यम् ॥
इत्थं भागवतस्तोत्रमग्रजेन विनिर्मितम् ।
व्यलिखन्मातृदत्ताख्यो भगवत्परिपूर्तये ॥

The date of the transcription of this MS. is the same as that for the MS. described under No. 10089, wherein it is given as extract.

No. 10086. नारायणीयम्.
NĀRAYAṆĪYAM.

Substance, Śrītāla. Size, 7¾ × 1¼ inches. Pages, 276. Lines, 8 on a page. Character, Malayālam. Condition, good. Appearance, new.

Complete.

Same work as the above.

No. 10087. नारायणीयम्.
NĀRĀYAṆĪYAM.

Substance, Śrītāla. Size, 9¼ × 2 inches. Pages, 162. Lines, 12 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Breaks off in the last stanza.

Same work as the above.

No. 10088. नारायणीयम्.
NĀRĀYAṆĪYAM.

Substance, Śrītāla. Size, 14 × 1¼ inches. Pages, 136. Lines, 7 on a page. Character, Malayālam. Condition, good. Appearance, new.

Breaks off at the close of the 722nd stanza.

Same work as the above.

No. 10089. नारायणीयम्—भक्तप्रियाव्याख्यासहितम्.
NĀRĀYAṆĪYAM WITH THE COMMENTARY BHAKTAPRIYĀ.

Substance, paper. Size, 10¾ × 8¾ inches. Pages, 530. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Same work as the above, but with a commentary, the author of which is not known.

Beginning:

सान्द्रानन्दावबोधात्मक . . हन्त भाग्यं जनानाम् ॥

गजाननं गिरां देवीं व्यासं कंसहनं गुरुम् ।
भूतेशमीशमाशासितार्थदान् प्रणतोऽस्म्यहम् ।

श्रीमद्भागवतार्थसंग्रहमयं नारायणीयाह्वयं
स्तोत्रं ह्यमनर्घमुज्ज्वलतरं ध्वस्तान्धकारोदयम् ।

यत्कर्णेषु सतामनुत्तमगुणं भत्यग्रमुद्भासते
तस्येयं क्रियते यथामति मया व्याख्या हि भक्तप्रिया ॥

कीर्तनं भगवत्कीर्तेर्मत्कृतावानुषङ्गिकम् ।
इत्येतन्नयते नारमद्व्याख्यातृत्वप्रसिद्धये ॥

इह खलु समधिगतनिखिलनिगमार्थतत्त्वतया शाब्दपरब्रह्मपारावार-पारीणतया परमभागवततया च सकलहृदयमहितयशाः श्रीनारायणकविः परमकारुणिकतया भक्तानुग्रहाय भागवतार्थानुसारि नारायणीयाभिधानं स्तोत्ररत्नं चिकीर्षुः प्रथमं प्रथमश्लोकेन प्रारिप्सितस्य स्तोत्रस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां श्रोतृजननिखिलसमीहितासिद्धये च स्तोत्रं जगत्सर्गविसर्ग . . . . लीलानिदानभूतपरत्वानुस्मरणरूपं मङ्गल-माचरति—सान्द्रेत्यादिना ।

End:

अज्ञात्वेति । द्वेधा नारायणीयं नारायणमधिकृत्य कृतत्वात् नारा-यणप्रोक्तत्वाच्च । ननु श्रुतिविहितमविहितं वेदं स्तोत्रं त्वत्प्रसादाय भूया-दित समर्थ्यत इति चेत् श्रुतिविहितमेवेत्याह—श्रुतिष्विति । जनुषा अवतारैः भगवतः स्तुत्यतया वर्णनं विधिर्विद्यते तेन स्फीतं व्याप्तम् । अथवा श्रुतिषु या जनुष, स्तुत्यता तस्याः ये स्तोतारः कवीन्द्राः इत्यादि-शब्दान्तरेण वर्णनेन लीलावतारैश्च स्फीतम् ॥

The scribe of the original MS., of which this is a copy, adds—

इत्थं भागवतस्तोत्रं स्वाग्रजेन विनिर्मितम् ।
व्यलिखन्मातृदत्ताख्यो भगवत्परिपूर्तये ॥

श्रीभागवततद्व्याख्यादृष्टानर्थान् पदानि च ।
स्तोत्रव्याख्यानरूपेण रचितानि परं मया ॥
यन्नाम्ना संमतं स्तोत्रं जनानामन्तरान्तरा ।
ताभ्यामेव हृदिस्थाभ्यां मया ने(चे)यं कृता कृतिः ॥

Colophon:

इति नारायणीयस्तोत्रव्याख्यायां भक्तप्रियाख्यायां द्वादशस्कन्धपरिच्छेदः समाप्तः ॥

१०१६ कोलं कुम्भमासि (१८) अष्टादशदिने मन्दवासरे कृत्तिकायां पूर्वपक्षषष्ठ्यां कर्कटलग्ने शंकरनाम्ना लिखितोऽयं ग्रन्थः ॥

No. 10090. नृसिंहप्रपत्तिः.

NṚSIMHAPRAPATTIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 61*b* of the MS. described under No. 5922.

Complete.

Stanzas expressing the self-surrender of the author to Nṛsimha.

Beginning:

ज्वालाहोबिलमालोलक्रोडाकारं च भार्गवः ।
योगानन्दघृताटोपपावनानघमूर्तये ॥

End:

यतो नृसिंहः परतो नृसिंहो यतो यतो वापि ततो नृसिंहः ।
नृसिंहदेवादधिकं न किंचित्ततो नृसिंहं शरणं प्रपद्ये ॥

No. 10091. नृसिंहभुजङ्गप्रयाताष्टकम्.

NṚSIMHABHUJAṄGAPRAYĀTĀṢṬAKAM.

Pages, 5 Lines, 5 on a page.

Begins on fol. 37*b* of the MS. described under No. 5958.

Complete.

In praise of Nṛsiṁha as associated with Lakṣmi. The work is written in the Bhujaṅgaprayāta metre and the efficacy of a formal repetition of this Stōtra is described in the last stanza below.

Beginning :

नमः सर्वगीर्वाणकोटीरकोटिस्फुरद्रत्ननिर्यन्ननीराजिताङ्घ्रिन् ।
शरच्चन्द्रकोटिप्रभाभासुराङ्गं नमस्कुर्महे वीरलक्ष्मीनृसिंहम् ॥

End :

भुजङ्गप्रयाताष्टकं पुष्टिकामप्रदं श्रीनृसिंहाङ्कितस्तोत्रमेतत् ।
पठेद्यः स तीर्त्वा विपद्वारिराशिं समग्रायुरारोग्यमैश्वर्यमेति ॥

No. 10092. नृसिंहभुजङ्गप्रयाताष्टकम्.

NṚSIṀHABHUJAṄGAPRAYĀTĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 84*a* of the MS. described under No. 9706.

Complete.

Same work as the above, but with a slight variation in reading in the latter half of the last stanza and with a colophon as given below.

End :

पठेद्भक्तियुक्तो लभेन्मोक्षलक्ष्मीं महावीरलक्ष्मीनृसिंहप्रसादात् ॥

Colophon :

इति श्रीनृसिंहाष्टकं समाप्तम् ॥

No. 10093. नृसिंहभुजङ्गप्रयाताष्टकम्.

NṚSIṀHABHUJAṄGAPRAYĀTĀṢṬAKAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 39*b* of the MS. described under No. 9391, wherein this work has been mentioned as Nṛsiṁhadaṇḍaka in the list of other works given therein.

Complete.

Same work as the above

No. 10094. नृसिंहमङ्गलम्.
NṚSIṀHAMANGALAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 60*b* of the MS. described under No. 5922.

Complete.

Stanzas pronouncing benedictions on Nṛsiṁha: by Śrinivāsa-muni.

Beginning:

श्रीपराशरयोगीन्द्रशठारिप्रमुखान् गुरून् ।
मङ्गलाशासनपरान् महितानिशं भजे ॥
जगज्जन्मादिलीलाय जगदानन्दहेतवे ।
जगच्चक्षुर्निवासाय श्रीनृसिंहाय मङ्गलम् ॥

End:

श्रीशठारियतीन्द्रादियोगिहृत्पद्मभानवे ।
सर्वत्र परिपूर्णायाहोबलेशाय मङ्गलम् ॥
मङ्गलाशासनमिदं श्रीनिवासमुनीरितम् ।
महनीयं पठन् शृण्वन् मङ्गलायतनं भवेत् ॥
अपारकरुणासिन्धो निवारणपरानिमान् ।
विदारय हिरण्याक्षविदारणनखायुधैः ॥

No. 10095. नृसिंहमङ्गलम्.
NṚSIṀHAMANGALAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 19*a* of the MS. described under No. 9651.

Complete

Same work as the above, but without the first stanza.

No. 10096. नृसिंहस्तवराजः.
NṚSIṀHASTAVARĀJAḤ.

Pages, 11. Lines, 18 on a page

Begins on fol 146*a* of the MS. described under No. 2361.

Complete.

From Nṛsiṁhapurāṇa.

This hymn of praise addressed to **Nṛsiṁha** is said to have been made by Prahlāda at the instance of Brahman. God Nṛsiṁha worshipped on the Siṁhācala in Vizagapatam, is also addressed herein.

Beginning:

नृसिंहक्षेत्रमाहात्म्यं शौनकाद्या महर्षयः ।
पप्रच्छुः प्रणता भूत्वा मार्कण्डेयमहामुनिम् ॥
केनोपायेन भगवन्नारसिंहमहाबलः ।
आशु तुष्यति सर्वात्मा तन्नो वद मुनीश्वर ॥

* * * *

इत्युक्तो लोकगुरुणा प्रह्लादः पद्मयोनिना ।
प्रणम्य प्राञ्जलिर्भूत्वा तुष्टाव नृहरिं मुदा ॥

* * * *

नमस्ते नरसिंहाय लोकरक्षणहेतवे ।
देवानां देवरूपाय कालाग्निसमचेत(तेज)से ॥

End:

सिंहशैलनिवासाय मदनुग्रहकारणात् ।
वराहनरसिंहाय नमस्ते शान्तमूर्तये ॥

* * * *

नृसिंहस्तवराजोऽयं भवद्भ्यः कथितो मया ।
पठतां शृण्वतां वापि सर्वाभीष्टफलप्रदः ॥
पठन्स्तवमिमं मर्त्यः सायं प्रातः समाहितः ।
सर्वापद्भ्यो विमुक्त(क्तो)ऽन्ते विष्णुसायुज्यमाप्नुयात् ॥

Colophon:

इति श्रीनृसिंहपुराणे ब्रह्मप्रेरितप्रह्लाद(प्र)थमकृतनृसिंहस्तवराजः समाप्तः ॥

No. 10097. नृसिंहस्तुतिः—सव्याख्या.

NṚSIMHASTUTIḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 13¾ × 1½ inches. Pages, 21. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

In praise of Nṛsiṁha as worshipped on the Siṁhācala (in the Vizagapatam district) with a commentary: by Abhinava Svayamprakāśānanda.

Beginning:

जिज्ञासूनां परं ब्रह्म सुखावगतये मया ।
व्याख्यायते नृसिंहस्य स्तुतिर्वेदान्तसंमतिः ॥

यद्यपि ब्रह्मणि परे सर्वधर्मविवर्जिते ।
शब्दप्रवृत्तिहेतूनां गुणादीनामसंभवः ॥

तथापि तस्य सर्वत्वात्सगुणे सविकारके ।
तेषां समुद्भवाच्छब्दात्सर्वे वर्तन्त आत्मनि ॥

इह खलु कश्चित्परमहंसावतंसः स्वात्मविलासावलोकनलीलालोलचेताः सर्वमुर्वीचक्रं चङ्क्रम्यमाणः कदाचित् स्वमवलोकयज्जनबहुजिह्मभवांहः-समूहसंहरणशीलं सिंहशैलमारुह्य प्रणवमयसिंहसंहननं किरिनरसिंहमखिल जगद्गुरुमवलोक्य संक्षेपतस्तदवतारकथाकथनपूर्वकं स्ववर्णाश्रमविहित-निष्कामकर्मार्पणप्रीतजगदीश्वरानुग्रहजातनित्यानित्यविवेकात्रामुत्रभोगविराग-शमदमादिसंपन्नमुमुक्षुजनाभिलषणीयं भोग्यजगद्भोक्तृजीवभोगप्रदपरमेश्वर-मोक्षप्रदगुरूणामत्यन्ताभेदबोधकमशेषवेदान्तशास्त्रसिद्धान्तं स्तुतिव्याजेन प्रदर्शयन् प्रस्तौति—

सर्वं जगन्मधुरिपोरतिरिक्तमेव मत्वा त्वदीयमसुरः स्वसुतं न्यरोधी(रौत्सी)त् ।
हत्वा तमश्रुतभवद्व्यतिरिक्तवाक्यनिष्ठार्थसंस्थितिमते नृहरे नमस्ते ॥

इति । नरं मनुष्योपलक्षितमखिलं स्वसत्तास्फूर्त्युपजीवितात्ममाया-वयवावृतिविक्षेपरूपशक्तिद्वयपरिकल्पितभूतभौतिकरूपमात्मना पूर्णानन्दरूपेण सैन्धवघनं जलनिधिरिव हरतीति नृहरिः ।

End:

'आत्मनो ब्रह्मणो भेदमनन्तं कः करिष्यति ।
परात्मनोर्मनुष्येन्द्र विभागोऽज्ञानकल्पितः ॥'

इति । विष्णुपुराणे च—

'अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्वगता भवन्ति ॥'

इति सर्वं समीचीनम् ॥

व्याख्यानं सदिदं वासस्कृतं बुद्ध्यनुसारतः ।
नृसिंह एव जानाति सर्वज्ञो भगवान्हरिः ॥
न पाण्डित्यप्रकाशाय विचारोऽसौ कृतो मया ।
येन केनाप्युपायेन चिन्त्यो हरिरितीच्छया ॥

रचितमभिनवस्वयंप्रकाशानन्दगिरा(रिणा)नरसिंहदेवनेतुः ।
स्मृतिहृदयविवेचनं यथावच्छितमतिना विदितं कथं नु न स्यात् ॥

Colophon:

इति नृसिंहस्तुतिव्याख्या समाप्ता ॥

No. 10098. नृसिंहस्तुतिः.

NṚSIṀHASTUTIḤ.

Page, 1. Lines, 22 on a page.

Begins on fol. 4*b* of the MS. described under No. 1021.

Complete.

This work gives warning to the mind or the soul of a person to meditate on Nṛsiṁha as associated with Lakṣmī and not to be led away by the glamour of sensual pleasures.

Beginning:

चेतोभृङ्ग भ्रमसि वृथा (रे) भवमरुभूमौ विरसायाम ।
भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥

स्रक्चन्दनवनितादीन्भोगान्सुखदान्मत्वा विहरसे चेत् ।
गन्धफलीसदृशा ननु तेऽमी भोगाश्चानन्तरदुःखकृतः ॥
शुक्तौ रजतप्रतिभा जाता कटकाद्यर्थसमर्था चेत् ।
दुःखमयी ते संसृतिरेषा निर्वृतिदानेऽतिनिपुणा स्यात् ॥

End:

तव हितमेकं वचनं वक्ष्ये शृणु सुखकामो यदि सततम् ।
स्वप्ने दृष्टं सकलं विमृषा जगति च सर्वं स्मर तद्वदिति ॥
भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥

Colophon:

इति नृसिंहस्तुतिः संपूर्णा ॥

No. 10099, नृसिंहस्तुतिः.
NRSIMHASTUTIH.

Pages, 2. Lines, 5 on a page.
Begins on fol. 133*a* of the MS. described under No. 9147.
Wants beginning and end.
In praise of Narasimha and Kṛṣṇa.

Beginning and End:

मन्थक्ष्मो . . . . . दण्डाङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥ ११ ॥
भक्तप्रतिज्ञापरिपालनाय सर्वात्मताव्याप्तिसमर्थनाय ।
दैत्येन्द्रवक्षोदलनाय विष्णुः स्तम्भान्नृसिंहाकृतिराविरासीत् ॥१२॥
न विचित्रं नरहरिता न च भवतः स्तम्भसंभूतिः ।
सुतजनकयोस्तदानीमपयभयालोक एव ते चित्रम् ॥ १३ ॥

श्रीवत्साङ्कैरनेकैर्नवजलदनिभैरेकरूपैः शरीरै-
रेकैकां तोषयित्वा स्मितललितकथागात्रसंस्पर्शभोगैः ।
एकीभूतः प्रभाते नखदशनपदालंकृतस्ते सहस्रं
शश्वत्सिंहासनस्थः प्रहसितवदनो यादवः पातु युष्मान् ॥ १४ ॥

No. 10100. नृसिंहस्तुतिः.

NṚSIṀHASTUTIḤ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Page, 1. Lines, 7 on a page. Character, Grantha and Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nyāsatilaka with commentary 2*a*, Nyāsaviṁśati with commentary 19*a*, Nyāsadaśaka with commentary 46*a*, Subhāṣitanīvī with commentary 51*a*.

Complete.

In praise of Nṛsiṁha as conceived in the Mantras relating to him.

Beginning :

भूभृद्भूभृद्भुजङ्ग क्रकरकरकरप्रज्वलज्ज्वालजालं
खर्जर्ज खर्जखर्ज खचखचखचितं गर्जदुर्जे जयन्तम् ।
भूभागं भोगभागं गगगगगगनं शस्त्रजालार्कजालं
ह्रां ह्रीं ह्रूं बीजरूपं नरहरिवपुषः पातु मां नारहिंसः(म्) ॥

End :

वन्देऽहं घोरघोरप्रकटनरमहागण्डभेरुण्डसिंहं
व्याघ्राश्वक्रोडशाखामृगखगवरराड्भल्लुकाद्यष्टवक्त्रम् ।
द्वात्रिंशत्कोटिबाहुं ज्व(ह)लमुसलगदाशङ्खचक्रादिहेतीन्
बिभ्राणं भीमदंष्ट्रं शरभखगगजान् भक्षयन्तं नृसिंहम् ॥

No. 10101. नृसिंहस्तुतिः.
NṚSIṀHASTUTIḤ.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 5. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 64*a*. The other works herein are Madhvavijaya 1*a*, Viṣṇustōtra 67*a*, Aṇumadhvavijaya 72*a*.

Complete.

In praise of Nṛsiṁha with a description of his form from head to foot: by Nārāyaṇapaṇḍitācārya, son of Likucatilaka.

Many stanzas here have a short intr duction in prose, apparently added by the author or a commentator.

Beginning:

अत्यन्तघोरभयदुष्टपिशाचसैन्यान् मित्राहितार(न)युतगान्मम शत्रुसङ्घान् ।
विनाशहेतो नरहरेस्तव गीतमार्यमुच्चारणाय लिखिताय नमो नमोऽहम् ॥

नारसिंहपादमस्तकं वर्णयन्तो नारयणपण्डितार्याः तं स्तोतुमारभन्ते—प्रलयेत्यादिना ।

प्रलयरविकरालाकाररुक्चक्रवाल विरलयदुरुरोचीरोचिताशान्तराल ।
प्रतिभयतमकोपात्युत्कटोच्चाट्टहासिन् दह दह नरसिंहासह्यवीर्याहितं मे ॥

पादवर्णनं करोति —सरसेति ।

End:

शिष्यानुजिघृक्षया स्वनामप्रख्यात(प)नपूर्वकं स्तोत्रमुपसंहरंस्तत्फलं वर्णयति— लिकुचेति ।

लिकुचतिलकसूनुः सन्धि(द्धि)तार्थानुसारी नरहरिनुतिमेतां शत्रुसंहारहेतुम् ।
अकृत सकलपापध्वंसिनीं यः पठेत्तां व्रजति नृहरिलोकं कामलोभाद्यसक्तः ॥

Colophon:

इति श्रीनारायणपण्डिताचार्यकृता नृसिंहस्तुतिः समाप्ता ॥

The scribe adds.

विरोधिकृद्वत्सरे चैत्रमासे पौर्णम्यां (मास्यां) श्रीचन्द्रवारे संपूर्णे चन्द्रोपरागे स्वातीयुते च गीता श्रीरङ्गपट्टणे लिखिता समाप्ता ॥

कंभालरुकुलाग्रजस्य हि कवीन्द्रस्यामयान् (य) ध्वंसक
स्याशेषश्रुतिधर्मशास्त्रनिपुणश्रीनारसिंहस्य तु ।
तत्पुत्रेण सबालकेन सहजेनाहोबिलेन ह्यलं
लिख्यन् श्रीमहनारसिंहवपुषे स्तोत्रं सदा(चा)र्पितम् ॥
उदयरविसहस्रद्योतितं रूक्षवीक्षं प्रलयजलधिनादं कल्पकृद्वह्निवक्त्रम् ।
सुरपतिरिपुवक्षश्छेदरक्तोक्षिताङ्गं प्रण(त)भयहरं तं नारसिंहं नमामि ॥
संपुटाकारेणाद्यन्तौ पठतामिष्टार्थप्राप्तिर्भवति ॥

No. 10102. न्यासतिलकम्.
NYĀSATILAKAM.

Pages, 4. Lines, 19 on a page.

Begins on fol. 33*a* of the MS. described under No. 2043.

Complete.

This is a hymn in praise of Raṅganātha and expressing teh auther's self-surrender to Him: by Vēdāntadēśika.

Beginning:

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दंपती जगतां पती ॥ १ ॥
प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।
हस्तः श्रीरङ्गभर्तुर्मामव्यादभयमुद्रितः ॥ २ ॥
अनादेर्निःसीम्नो दुरितजलधेर्यन्निरुपमं
विदुः प्रायश्चित्तं यदुरघुधुरीणाशयविदः ।
तदारम्भे तस्या गिरमवदधानेन मनसा
प्रपद्ये तामेकां श्रियमखिलनाथस्य महिषीम् ॥ ३ ॥

* * * *

स्वतःसिद्धः श्रीमानमितगुणभूमा करुणया
विधाय ब्रह्मादीन् वितरति निजादेशमपि यः ।

प्रपत्त्या साक्षाद्वा भजनशिरसा वापि सुलभं
मुमुक्षुर्देवेशं तमहमधिगच्छामि शरणम् ॥ ६ ॥

End:

विधानं रङ्गेशादधिगतवतो वेङ्कटकवेः
स्फुरद्वर्णं वक्के परिकलयतां न्यासतिलकम् ।
इहामुत्राप्येषं प्रणतजनचिन्तामणिगिरिः
स्वपर्यङ्के सेवां दिशति फणिपर्यङ्करसिकः ॥ ३२ ॥
कवितार्किक . . . गुरवे नमः ॥

Colophon:

न्यासतिलकं संपूर्णम् ॥

No. 10103. न्यासतिलकम्.
NYĀSATILAKAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 5777.

Complete.

Same work as the above.

No. 10104. न्यासतिलकम्.
NYĀSATILAKAM.

Pages, 9. Lines, 7 on a page.

Begins on fol. 31*a* of the MS. described under No. 9662.

Complete.

Same work as the above, but without colophon.

No. 10105. न्यासतिलकम्.
NYĀSATILAKAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. 25*a* of the MS. described under No 3546.

Wants the first stanza; otherwise complete.

Same work as the above, but with full colophon as given below.

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यासतिलकं संपूर्णम् ॥

No. **10106.** न्यासतिलकम्.
NYÂSATILAKAM.

Pages, 5. Lines, 8 on a page.

Begins on fol. 71*a* of the MS. described under No. 9610.

Complete.

Same work as the above, but without colophon.

No. **10107.** न्यासतिलकम्.
NYÂSATILAKAM.

Pages, 10. Lines, 6 on a page.

Begins on fol. 40*a* of the MS. described under No. 9388.

Wants beginning; otherwise complete.

Same work as the above.

No. **10108.** न्यासतिलकम्.
NYÂSATILAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 292*a* of the MS. described under No. 9001, and not on fol. 290*a* as stated therein.

Contains the last two stanzas only.

Same work as the above.

No. **10109.** न्यासतिलकम्—सव्याख्यानम्.
NYÂSATILAKAM WITH COMMENTARY.

Pages, 33. Lines, 8 on a page.

Begins on fol. 2*a* of the MS. described under No. 10100.

Complete, but the commentary for the last two stanzas is wanting.

Same work as the above, with a commentary by Varadârya, son of Vêṅkaṭanâtha or Vêdântadêśika of Viśvâmitragôtra, the author of the text.

Beginning:

श्रीमद्रामानुजाचार्यसिद्धान्ताम्बुजभानवे ।
कवितार्किकसिंहाय वेदान्तगुरवे नमः ॥
क्षेत्रे कीटिफलप्रदे निरुपमे सत्यव्रताख्ये पुरे
काञ्चीनामनि वेङ्कटेश्वरमहाघण्टाख्यसूरिः पुरा ।
कालातङ्कविमोहितात्मकृतमप्यल्पं बहु स्यामिति
स्वामिस्वान्तविदागमान्तगुरुरित्याविर्बभूव स्वभूः ॥
श्रीमान् वेदशिरोगुरुर्भगवतः श्रीवेङ्कटाद्रीशितु-
र्घण्टात्मा न परं तदातनजनानानन्दयन्नात्मना ।
अद्यापि स्वपदाम्बुजैकरसिकानानन्दयन्वैभवं
पन्थानं परिपाति भूरिकृपया पर्यायसंलापतः ॥

* * * *

विश्वामित्रकुलोद्भूतवरदार्येण वर्ण्यते ।
आचार्यरचितन्यासातिलकस्यार्थनिर्णयः ॥

अत्र खलु आचार्यतातपादनिर्मितस्य तिलकस्य तात्पर्यं दिङ्मात्रेण श्रोतृजनसंप्रीतये प्रकाशयामि । स चाचार्यवशो ज्ञेयः, आचार्याणामसावसावित्याभगवत्त इति श्रुतिसिद्धगुरुपरम्परानुसन्धानस्य स्वानुष्ठानमुखेन कर्तव्यतामाह—

गुरुभ्यस्तद्गुरुभ्यश्च . . दंपती जगतां पती ॥

अयमत्र श्रुत्यर्थः—अध्यात्मविद्योपदेशपारम्पर्यमेवाचार्यवंशः, विद्याजन्मानुसारेण गुरुपारम्पर्यविधानात् । न केवलं जन्म । अतएव शठरिपुनाथलक्ष्मणाचार्यप्रभृतयो हि भिन्नदेशीया अपि गुरुपरम्परायामनुसंधीयन्ते ।

End:

इन्दिरेशेत्युक्तत्वात् युवयोरिति दिव्यदम्पत्योरुपादानम् ॥ २० ॥
आचार्यादिङ्गघुर्यद्वयसमाधिगमे लब्धसत्त्वं तदात्वे

* * * *

स्वपर्यङ्के सेवां दिशति फणिपर्यङ्करसिकः ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्यं वेदान्ताचार्यस्य कृतिषु न्यासतिलकं व्याख्यया सार्धं संपूर्णम् ॥

कवितार्किक . . . . गुरवे नमः ॥

No. 10110. न्यासतिलकम्—सव्याख्यानम्.

NYĀSATILAKAM WITH COMMENTARY.

Pages, 60. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9790.

Complete.

The first three-and-a-half pages contain the beginning of the commentary described above; the commentary contained thereafter and described herein wants the introductory passages.

Same work as the above, but with a different commentary. The author thereof is Śrībhāṣya Śrīnivāsa of Kauśikagōtra.

Beginning :

तत्रादौ गुरुपरम्परां नमस्करोति—

गुरुभ्यस्तद्गुरुभ्यश्च . . . . . दंपती जगतां पती ॥

गुरुभ्यो व्यवहितेभ्योऽस्मद्गुरुभ्यस्तद्गुरुभ्यस्तेषामाचार्येभ्यश्चकारात्तद्गुरुभ्यश्च नमोवाकं नमोवचनम्; वचेर्घातोर्नमस्युपपदे चजोस्तो(जोः) इति कुत्वम् ।

End :

यथा कश्चित्कस्माचित्सिद्धपुरुषाद्वश्यादिसाधनतिलकविधानमाधिगम्य तिलकद्रव्यं सातिलकं यः कश्चन ललाटे धृत्वा सार्वभौमं राजानं वशीकरोतीति तिलकवशीकृतः स च तं शुद्धान्तेऽप्यन्तरङ्गतयाधिकृत्य तस्मै स्वसमानभोगं दास्यति तद्वदिति भावः ॥

Colophon :

श्रीभाष्यश्रीनिवासेन कौशिकान्वयशोभिना ।

कृतेयं न्यासतिलकव्याख्या भाषा विचक्षणैः ॥

No. 10111. न्यासतिलकम्—सव्याख्यानम्.
NYĀSATILAKAM WITH COMMENTARY.

Pages, 34. Lines, 8 on a page.

Begins on fol. 100*a* of the MS. described under No. 2283.

Complete.

Similar to the above. The commentator here is Raghupati, son and disciple of Dēvarājaguru, who is himself the disciple of Varadārya of Vādhūlagōtra.

Beginning :

श्रीमद्वाधूलवरदार्यपदावलम्बी
श्रेयोनिधिर्मम गुरुर्जनकश्च विद्वान् ।
श्रीदेवराजगुरुराश्रितकल्पभूजः
श्रेयस्तनोतु मम कालभवाब्धिचन्द्रः ॥
श्रीमद्वेदान्तगुरवे नमो भूयो नमो नमः ।
संजीवनाय सर्वेषां येन न्यासः प्रकाशितः ॥
वाधूलश्रीनिवासार्यवरदार्यगुरूत्तमौ ।
प्रणम्य प्रणमामीशं पद्माहृत्पद्मभूषणम् ॥

श्रीरङ्गनाथदिव्याज्ञालब्धवेदान्ताचार्यपदः सदाचार्यप्रसादसमधिगतस्वरूपोपायपुरुषार्थविवेचनः सर्वतन्त्रस्वतन्त्रः श्रीमद्वेङ्कटनाथार्यो भवभयातुरजनावलोकनजनितकरुणापरवशो भूत्वा तदुज्जीवनायात्युत्तमं न्यासयोगं न्यासतिलकाख्यग्रन्थेन प्रकाशयितुकामः

* * * *

प्रारिप्सितग्रन्थपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलमङ्गलमाचरति—गुरुभ्य इति ।

गुरुभ्यस्तद्गुरुभ्यश्च . . . दंपती जगतां पती ॥

इह गुरुशब्देन "अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते" इत्याद्युक्तमज्ञाननिवर्तकत्वप्रयुक्तमुपकारकत्वम् ।

End:

यद्वा स्वस्य पर्यङ्के पर्यङ्कवत्साधनभूते पर्यङ्कशब्दलक्षिते स्वस्याङ्के सेवां दिशति स्वविग्रहसेवां ददाति 'अङ्कमारोपितः प्रेम्णा' इत्यभियुक्तोक्तेः संभवादिति सर्वं समञ्जसम् ॥

श्रीकान्तशुभवंशेन्दुर्वरदाचार्यकिङ्करः ।
प्रावृणोन्न्यासतिलकं रघूणां पतिरुज्वलः ॥
कवितार्किक . . . गुरवे नमः ॥

No. 10112. न्यासतिलकम्—सव्याख्यानम्.

NYĀSATILAKAM WITH COMMENTARY.

Pages, 68. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 9837.

Almost complete.

Same work as the above.

No. 10113. न्यासतिलकम्—सव्याख्यानम्.

NYĀSATILAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 36 Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Rahasyamañjarī 19*a*, Nyāsaviṁśati with commentary 28*a*, Śrīvacanabhūṣaṇavyākhyā 40*a* (Maṇipravāla).

Complete.

Same work as the above.

No. 10114. न्यासतिलकव्याख्या.

NYĀSATILAKAVYĀKHYĀ.

Substance, palm-leaf. Size, 11⅞ × 1⅝ inches. Pages, 36. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 41*a*. The other work herein is Nyāsaviṁśativyākhyā 1*a*.

Breaks off in the 20th stanza.

The commentary is the same as the one described under No. 10109.

No. 10115. न्यासदशकम्.
NYĀSADAŚAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 101*b* of the MS. described under No. 9706.

Complete.

Same work as the one described under R.No. 175(*d*) of the Triennial Catalogue of MSS., Vol. I, Part I-A.

No. 10116. न्यासदशकम्.
NYĀSADAŚAKAM.

Pages, 4. Lines, 3 on a page.

Begins on fol. 1*a* of the MS. described under No. 9683.

Complete.

Same work as the above, but with a brief colophon as given below :—

न्यासदशकं संपूर्णम्.

No. 10117. न्यासदशकम्.
NYĀSADAŚAKAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 56*a* of the MS. described under No. 2380, wherein this work has been mentioned as Nyāsaśataka in the list of other works given therein.

Complete.

Same work as the above but without colophon.

No. 10118. न्यासदशकम्.
NYĀSADAŚAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 3*a* of the MS. described under No. 9655.

Complete.

Same work as the above.

No. 10119. न्यासदशकम्.

NYĀSADAŚAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under No. 8900, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Same work as the above.

No. 10120. न्यासदशकम्.

NYĀSADAŚAKAM.

Page, 1. Lines, 10 on a page.

Begins on fol. 15*b* of the MS. described under No. 9729.

Complete.

Same work as the above, but with full colophon and with the addition of one stanza at the end as given below :—

संसारावर्तवेगप्रशमनशुभदृद्देशिकप्रेक्षितोऽहं
संत्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः ।
निःशङ्कस्तत्त्वदृष्ट्या निरवधिकदयं प्राप्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि ॥

No. 10121. न्यासदशकम्.

NYĀSADAŚAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 24*b* of the MS. described under No. 3546.

Complete.

Same work as the above, but with full colophon.

No. 10122. न्यासदशकम्.
NYĀSADAŚAKAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 32*b* of the MS. described under No. 2043.

Complete.

Same work as the above, but with incomplete colophon.

No. 10123. न्यासदशकम्.
NYĀSADAŚAKAM.

Page, 1. Lines, 12 on a page.

Begins on fol. 21*a* of the MS. described under No. 3550.

Complete.

Same work as the above.

No. 10124. न्यासदशकम्.
NYĀSADAŚAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 92*a* of the MS. described under No. 1837.

Complete.

Same work as the above.

No. 10125. न्यासदशकम्—सव्याख्यानम्.
NYĀSADAŚAKAM WITH COMMENTARY.

Pages, 10. Lines, 7 on a page.

Begins on fol. 46*a* of the MS. described under No. 10100.

Complete.

Same work as the above, with the commentary of Śrībhāṣya Śrīnivāsācārya.

Beginning :

श्रीमान् वेङ्कटनाथार्यः . . संनिधत्तां सदा हृदि ॥
वेदान्ताचार्यगुरुर्यदिदं न्यासदशकमाचष्ट ।
व्याख्यास्यति तत्समासात् श्रीभाष्यश्रीनिवास इह सूरिः ॥

इह खलु सात्त्विकाभिप्रेरितः श्रीमान् वेदान्ताचार्य इति प्रसिद्धः श्रीमद्वेङ्कटनाथार्यः न्यासविद्यायाः स्वरूपं स्वभावं च प्रपत्तिशास्त्रप्रपञ्चितं विरलबुद्धीनां सुग्रहत्वाय दशभिरनुष्टुभिः पद्यैः संजग्राह । तं न्यासदशकाख्यं ग्रन्थं यथोपदेशं यथामति संग्रहतो व्याख्यास्यति श्रीभाष्यश्रीनिवासार्यः कौशिकान्वयसंभवः । तत्रादौ त्रिभिः पद्यैः द्वयस्य

* * * *

अहमिति । अहमर्थ आत्मस्वरूपं न मम मम शेषभूतं न भवति ।

End:

मम रक्षणे स्वप्राप्तिरूपे मदुज्जीवने यो भरनिर्वाहः तस्य समर्पणम् अचीकरः कारितवानसि । अतो मत्तो भारानपयनात् अहं त्वयि न्यस्तभरः तदर्थं कर्तव्यशेषरहितः भरन्यासात्परस्मिन् काले निर्भरो विगतसर्वभरोऽस्मीति सर्वं सुस्थम् ।

श्रीन्यासदशकव्याख्या या हि संक्षेपतः कृता ।
सेयं सुधीभिर्हृदये नित्यं धार्यार्थसिद्धये ॥

कवितार्किकसिंहाय . . वेदान्तगुरवे नमः ।

The scribe adds:

वंगिपुरं विजयरामानुजदासेन लिखितं संपूर्णम् ॥

No. 10126. न्यासदशकव्याख्या.

NYĀSADAŚAKAVYĀKHYĀ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 84*a* of the MS. described under No. 9790.

Complete.

Same commentary as the above.

No. 10127. न्यासविंशतिः.
NYĀSAVIMŚATIḤ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 9947.

Complete.

This is a work explaining with some details the path of salvation known as Nyāsavidyā, *i.e.*, the doctrine of self-surrender to the mercy of God as a means of salvation. By Vēdantadēsika.

Beginning:

श्रीमान् वेङ्कटनाथार्यः . . . संनिधत्तां सदा हृदि ॥
सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम् ।
डम्भासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं
स्खालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥

End:

श्रुत्या स्मृत्यादिभिश्च स्वयमिह भगवद्वाक्यवर्गैश्च सिद्धां
स्वातन्त्र्ये पारतन्त्र्येऽप्यनितरगतिभिः सद्भिरास्थीयमानाम् ।
वेदान्ताचार्य इत्थं विविधगुरुजनग्रन्थसंवादवत्या
विंशत्या न्यासविद्यां व्यवृणुत सुधियां श्रेयसे वेङ्कटेशः ॥
कवितार्किकसिंहाय . . . गुरवे नमः ॥

No. 10128. न्यासविंशतिः.
NYĀSAVIMŚATIḤ.

Pages, 4. Lines, 9 on a page.

Begins on fol. 27*a* of the MS. described under No. 3546.

Complete.

Same work as the above, but with colophon as given below :—

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यासविंशतिः संपूर्णा ॥

No. 10129. न्यासविंशतिः.
NYĀSAVIṀŚATIḤ.

Pages, 4. Lines, 12 on a page.

Begins on fol. 21*b* of the MS. described under No. 3550

Complete.

Same work as the above.

No. 10130. न्यासविंशतिः.
NYĀSAVIṀŚATIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 2820

Complete.

Same work as the above, but without colophon.

No. 10131. न्यासविंशतिः.
NYĀSAVIṀŚATIḤ.

Pages, 10. Lines, 4 on a page.

Begins on fol. 3*a* of the MS. described under No. 5777.

Complete.

Same work as the above, but with a brief colophon as given below :—

इति न्यासविंशतिः समाप्ता ॥

No. 10132. न्यासविंशतिः.
NYĀSAVIṀŚATIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 2422.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

संसारावर्तवेगप्रशमनशुभकृद्देशिकप्रेक्षितोऽहं
संत्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः ।

निःशङ्कस्तत्त्वदृष्ट्या निरवधिकदयं प्राप्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि ॥
कवितार्किकसिंहाय . . . गुरवे नमः ॥

No. 10133. न्यासविंशतिः.

NYĀSAVIṀŚATIḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 13*a* of the MS. described under No. 9702.

Complete.

Same work as the above.

No. 10134. न्यासविंशतिः.

NYĀSAVIṀŚATIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 99*a* of the MS. described under No. 9706.

Complete.

Same work as the above.

No. 10135. न्यासविंशतिः.

NYĀSAVIṀŚATIḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 41*b* of the MS. described under No. 2043.

Complete.

Same work as the above, but with a brief colophon.

No 10136. न्यासविंशतिः.

NYĀSAVIṀŚATIḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 13*a* of the MS. described under No. 9389, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Same work as the above.

No. 10137. न्यासविंशतिः.

NYĀSAVIMŚATIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 51*a* of the MS. described under No. 2965.

Complete.

Same work as the above, but with colophon.

No. 10138. न्यासविंशतिः—सव्याख्या.

NYĀSAVIMŚATIḤ WITH COMMENTARY.

Pages, 54. Lines, 9 on a page.

Begins on fol. 19*a* of the MS. described under No. 10100.

Complete.

Same work as the above, but with a commentary by Nārāyaṇamuni. It is stated herein that Vēdāntadēśika himself wrote a brief commentary on his own work.

Beginning:

श्रीमान् वेङ्कटनाथार्यः . . . संनिधत्तां सदा हृदि ॥

आत्रेयरामानुजदेशिकेन्द्रपादारविन्दश्रवणात्मवृत्तिम् ।
समस्तकल्याणगुणाम्बुराशिं वेदान्तविद्यागुरुमाश्रयामः ॥

सकलश्रुतिस्मृतीतिहासपुराणेषु अन्तःसारतया प्रतिपाद्यमानां भगवत्पराङ्कुशपरकालनाथयामुनयतिवरादिसकलदेशिकवरपरिगृहीतां प्रपत्तिविद्यां संग्रहीतुकामो भगवान् श्रीरङ्गराजदिव्याज्ञालब्धवेदान्ताचार्यापरनामधेयः

* * * *

श्रीमान् वेङ्कटदेशिकः प्रप(न्न)जनसार्थं कृतार्थयितुं प्रपत्त्यधिकारहेतुभूतसदाचार्यवरणमाह—सिद्धमिति ।

सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं

*   *   *   *

स्वालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥ १ ॥

यद्यपि वेदान्ताचार्यप्रणीतमेव व्याख्यानं तत्र तत्र विद्यते, तथापि तस्य दुर्ग्रहार्थत्वात् कार्त्स्न्येन श्लोकार्थकथनाभावाच्च तदनुसारेण यथासंप्रदायं व्याख्यास्यते इत्यर्थवानयमस्मि(न्) प्रारम्भः ।

End :

फलसङ्गकर्तृत्वादित्यागयुक्तसाङ्गभरन्यासेन कृतकृत्यस्वीकृतभरं शरण्यं श्रियःपतिमवलोक्य निर्भरो निर्भयश्च स्वयंप्रयोजनकार्येण सुखं वर्त ते-(इ)ति ॥ २२ ॥

श्रीमन्नारायणमुनिः संप्रदायानुसारतः ।

टीकां पट्वीं महत्प्रीत्यै चकार न्यासविंशतेः ॥

Colophon :

न्यासविंशतिव्याख्या संपूर्णा ॥

No. **10139.** न्यासविंशतिः—सव्याख्या.

NYĀSAVIṀŚATIḤ WITH COMMENTARY.

Pages, 23. Lines, 10 on a page.

Begins on fol. 28*a* of the MS. described under No. 10113.

Complete.

Same work as the above, but with a slightly different end and a full colophon as given below :—

End :

टीकां पटीयसां प्रीत्यै चकार न्यासविंशतेः ॥

Colophon :

इति श्रीमन्नारायणमुनिनामधेयश्रीमत्परमहंसपरिव्राजकाचार्यकृता न्यासविंशतिटीका संपूर्णा ॥

No. **10140**. न्यासविंशतिः—सव्याख्या.

NYĀSAVIMŚATIḤ WITH COMMENTARY.

Pages, 26. Lines, 8 on a page.

Begins on fol. 126a of the MS. described under No. 2283.

Complete.

Same work as the above.

No. **10141**. न्यासविंशतिः—सव्याख्या.

NYĀSAVIMŚATIḤ WITH COMMENTARY.

Pages, 47. Lines, 6 on a page.

Begins on fol. 35a of the MS. described under No. 9837.

Complete.

The commentary herein is said to be by Śrībhāṣyam Śrīnivāsa of Kauśikagōtra, who says that he has expanded the commentary by the author himself.

Beginning:

वेङ्कटेशगुरुशेखरोदितां न्यासविंशतिमुदारगुम्फलाम् ।
व्याकरोति तदनुग्रहात्स्फुटं श्रीनिवास इह कौशिकान्वयः ॥

श्रीमान् वेङ्कटनाथार्यः सद्भिरभ्यर्थितः सकललोकोजीवनाय श्रुतिस्मृतिशास्त्रार्थनिरूढन्यासविंशतिं प्रणीय तामि(म)तिसंग्रहतो व्याकरोत् । तद्व्याक्रियामनुसृत्येह तत्प्रसादतो नातिसंकोचविस्तरां व्याख्यां बालबोधिनीमभिधास्य(स्ये) ।

* * * *

आचार्यसंग्रहणमाह—

सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं

* * * *

स्खालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥

आचार्यसंग्रहे तदनुगुणवत्त्वे च तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादीनि प्रमाणानि द्रष्टव्यानि । भूष्णुः भगवच्छ्रीपादारविन्दसमाश्रयणेन संसारमवधूय नित्यकिङ्करो भवेयति(मि) तीच्छुः पुमान् देशिकमीप्सेत् सदाचार्यमाप्तुमिच्छेत् इति विधिः ।

End :

श्रियः पतिमवलोक्य निर्भरो निर्भयश्च स्वयंप्रयोजनकैङ्कर्येण सुखं वर्ते ते(इ)ति ॥

वेदान्ताचार्यगुरुभिः संदृष्टा न्यासविंशतिः ।
श्रीभाष्यश्रीनिवासेन व्याख्यातो(ते)यं यथामति ॥
न सामर्थ्येन भक्त्यैव प्रेरितेन यथामति ।
मयेयं विहिता व्याख्या सेयं शोध्यानसूसुभिः ॥

Colophon :

श्रीभाष्यश्रीनिवासेन कौशिकान्वयजन्मना ।
कृता मनोज्ञा व्याख्येयं संपूर्णा न्यासविंशतेः ॥

No. 10142. न्यासविंशतिव्याख्या.
NYĀSAVIṀŚATIVYĀKHYĀ.

Pages, 80. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 10114.

Complete.

Same commentary as the above, but the end is as in No. 10138.

No. 10143. न्यासविंशतिव्याख्या.
NYĀSAVIṀŚATIVYĀKHYĀ.

Pages, 58. Lines, 7 on a page.

Begins on fol. 89*a* of the MS. described under No. 9790.

Complete.

Same work as the above, but with a slightly different end and a wrong colophon as given below :—

End :

टीकां महीयसां प्रीत्यै चकार न्यासविंशतेः ॥

Colophon :

कवितार्किकसिंहस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यासविंशतिव्याख्यानं संपूर्णम् ॥

No. 10144. न्यासविंशतिव्याख्या.
NYĀSAVIṀŚATIVYĀKHYĀ.

Pages, 19. Lines, 6 on a page.

Begins on fol. 33a of the MS. described under No. 2965.

Breaks off in the eleventh stanza.

Same work as the above.

No. 10145. न्यासविंशतिव्याख्या.
NYĀSAVIṀŚATIVYĀKHYĀ.

Substance, palm-leaf. Size, 12⅝ × 1⅜ inches. Pages, 37. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1a. The other work herein is Vairāgyapañcaka 20a.

Complete.

This commentary on the Nyāsaviṁśati is also said to be by a Nārāyaṇamuni, who is probably different from the author of the commentary described under No. 10138.

Beginning:

श्रीशठारियतीशानचरणौ शरणं व्रजे ।
हृदये मम यद्भक्त्या न्यासविद्या विजृम्भते ॥

ममातिसाहसं सन्तः क्षन्तुमर्हन्ति सांप्रतम् ।
यद्वेदान्तगुरोर्वाचां कृता व्याख्याविडम्बना ॥

इह खलु वेदान्ताचार्यस्तापत्रयातुरान् मादृशानुपायान्तर(अ)हणाशक्तानवलोक्य परमकारुणिकतया श्रुतिस्मृत्यादिष्वपवर्गोपायतया प्रसिद्धां प्रपत्त्याद्यपरपर्यायां न्यासविद्यां संजिघृक्षुः प्रथमं तत्त्वज्ञानादिमुखेन तदधिकारहेतुभूतम् 'आचार्यवान् पुरुषो वेद,' 'आचार्यवत्तया मुक्तौ' इत्यादिप्रमाणसिद्धमाचार्यसंग्रहणमाह । भू सत्तायामिति धातोरिष्णुच्प्रत्ययान्तोऽयं

शब्दः; सत्तायोगी भविष्यन्नित्यर्थः। सत्ता हि परमपुरुषज्ञानादेव सिध्यति। तथाच श्रूयते---'अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति', मुमुक्षुरिति यावत्।

End:

श्रियः पतिमवलोक्य निर्भरो निर्भयश्च स्वयंप्रयोजनकैङ्कर्येण सुखं वर्तेते(इ)ति ॥

संभर्तेति तथा भर्तुः भकारोऽर्थद्वयान्वितः।
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥

* * * *

एवमेषु महाशब्दो मैत्रेय भगवानिति।
परमब्रह्मभूतस्य वासुदेवस्य नान्यथा ॥

Colophon:

इति परमहंसपरिव्राजकाचार्यसर्वतन्त्रोभयवेदान्ताचार्यश्रीमन्नारायणमुनिकृतौ न्यासविंशतिव्याख्या संपूर्णा ॥

No. 10146. नरसिंहपञ्चरत्नस्तोत्रम्.

NARASIṀHAPAÑCARATNASTOTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 24a of the MS. described under No. 3178.

Complete.

Five stanzas in praise of Narasiṁha, the man-lion incarnation of Viṣṇu, and calling upon the human mind to engage itself in his worship. The work is attributed to Śaṅkarācārya.

Beginning:

चेतोभृङ्ग भ्रमसि वृथा भो(भव)मरुभूमौ विरसायाम्।
भज भज लक्ष्मीनरसिंहनखपदसरसिजमकरन्दम् ॥

End:

त्वं प्रभुजीव प्रियमिच्छसि चेन्नरहरिपूजां कुरु सततम् ।
प्रतिबिम्बालंकृतिविधिकुशलाद्बिम्बालंकृतिमादधते ॥

चेतो—

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं पञ्चरत्नस्तोत्रं संपूर्णम् ॥

No. 10147. परमार्थस्तुतिः.
PARAMĀRTHASTUTIḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 28*b* of the MS. described under No. 3546.

Complete.

This is a hymn in praise of Raṇapuṅgava, also called Vijayarāghava, worshipped as a form of Viṣṇu at Gṛdhrasaras (Tirupputkuḻi) near Conjeeveram. By Vēdāntadēśika.

Beginning:

श्रीमान् वेङ्कटनाथार्यः . . . संनिधत्तां सदा हृदि ॥

श्रीमद्गृध्रसरस्तीरपारिजातमुपास्महे ।
यत्र तुङ्गैरतुङ्गैश्च प्रणतैर्गृह्यते फलम् ॥ १ ॥
गुरुभिस्त्वदनन्यसर्वभावैर्गुणसिन्धौ कृतसंप्लवस्त्वदीये ।
रणपुङ्गव वन्द्य(न्दि)भावमिच्छन्नहमस्म्येकमनुग्रहास्पदं ते ॥ २ ॥

End:

अवधीर्य चतुर्विधं पुमर्थं भवदर्थे विनियुक्तजीवितः सन् ।
लभते भवतः फलानि जन्तुर्निखिलान्यत्र निदर्शनं जटायुः ॥ ८ ॥

* * * *

विमलाशयवेङ्कटेशजन्मा रमणीया रणपुङ्गवप्रसादात् ।
अनसूयुभिरादरेण भाव्या[:] परमार्थस्तुतिरन्वहं प्रपन्नैः ॥ १० ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु परमार्थस्तुतिः संपूर्णा ॥

No. **10148.** परमार्थस्तुतिः.
PARAMĀRTHASTUTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 83*a* of the MS. described under No. 9388.

Complete.

Same work as the above.

No. **10149.** परमार्थस्तुतिः.
PARAMĀRTHASTUTIḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 2*a* of the MS. described under No. 9782.

Complete.

Same work as the above, but without colophon.

No. **10150.** परमार्थस्तुतिः.
PARAMĀRTHASTUTIḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 102*b* of the MS. described under No. 9706.

Complete.

Same work as the above, but with this short colophon:

परमार्थस्तुतिः संपूर्णा ॥

No. **10151.** परमार्थस्तुतिः.
PARAMĀRTHASTUTIḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 28*b* of the MS. described under No. 9012.

Complete.

